नं. ४११३

नाम. भगवद्गीता गूढार्थ
दीपिका टीका
१म २याध्यायौ.

कर्ता श्री मधुसूदन सरस्वती.

पत्र.स. ६१ स. ×

विषय. वेदान्त शास्त्रं
(महाभारते.)

भगवद्गीताटीका गूढार्थदीपिका प्रथमद्वितीयाध्यायौ

४९९३

4993

4 to 12 MISSING
52 double
F. = 53

गी॰टी॰
म॰प्र॰
१

ॐ श्रीगणेशाय नमः ॐ नमः सरस्वत्यै॥ ॐ भगवत्पादभाष्यार्थमालोच्यातिप्रयत्नतः
प्रायः प्रतिपदं कुर्वे गीतागूढार्थदीपिकां ॥१॥ सहेतुकस्य संसारस्यात्यंतोपरमात्मकं ॥
परं निःश्रेयसं गीताशास्त्रस्योक्तं प्रयोजनं ॥२॥ सच्चिदानंदरूपं तत्पूर्णं विष्णोः परं पदं
यत्प्राप्तये समारब्धा वेदाः कांडत्रयात्मकाः ॥३॥ कर्मोपास्तिस्तथा ज्ञानमिति कांडत्रयं
क्रमात् ॥ तद्रूपाष्टादशाध्यायी गीता कांडत्रयात्मिका ॥४॥ एकमेकेन षट्केन कां
डमत्रोपलक्षयेत् ॥ कर्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमांत्ययोः ॥५॥ यतः समुच्चयो
नास्ति तयोरतिविरोधतः ॥ भगवद्भक्तिनिष्ठा तु मध्यमे परिकीर्तिता ॥६॥ उभयानु
गता सा हि सर्वविघ्नापनोदनी ॥ कर्ममिश्रा च शुद्धा च ज्ञानमिश्रा च सा त्रिधा ॥७॥ त
त्र तु प्रथमे कांडे कर्मतत्त्यागवर्त्मना ॥ त्वंपदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते ॥८॥
द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना ॥ भगवान्परमानंदस्तत्पदार्थोऽवधार्यते ॥९॥
तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटं ॥ एवमप्यत्र कांडानां संबंधोऽस्ति परस्परं ॥१०॥
प्रत्यध्यायं विशेषस्तु तत्र तत्रैव वक्ष्यते ॥ मुक्तिसाधनपर्वेदं शास्त्रार्थत्वेन कथ्यते ॥११॥

दा

त्वंपदार्थंतत्पदार्थं
तदैक्यंवर्णनप्रकारे
णेति=१

निष्कामकर्मत्वपि =

निष्कामकर्मानुष्ठानं त्यागात्काम्यनिषिद्धयोः ॥ तत्रापि परमो धर्मो जपस्तुत्यादिकं हरेः
१२ ॥ क्षीणपापस्य चित्तस्य विवेके योग्यता यदा ॥ नित्यानित्यविवेकस्तु जायते सुदृढ-
स्तदा ॥ १३ ॥ इहामुत्रार्थवैराग्यं वशीकाराभिधं क्रमात् ॥ ततः शमादिसंपत्तौ संन्या-
सो निष्ठितो भवेत् ॥ १४ ॥ एवं सर्वपरित्यागान्मुमुक्षा जायते दृढा ॥ ततो गुरूपसद-
नमुपदेशग्रहस्ततः ॥ १५ ॥ ततः संदेहनाशाय वेदान्तश्रवणादिकं ॥ सर्वमुत्तरमी-
मांसाशास्त्रमत्रोपयुज्यते ॥ १६ ॥ ततस्तत्परिपाकेन निदिध्यासननिष्ठता ॥ योगशा-
स्त्रं तु संपूर्णमुपक्षीणं भवेदिह ॥ १७ ॥ क्षीणदोषे ततश्चित्ते वाक्यात्तत्त्वमतिर्भवेत्
साक्षात्कारो निर्विकल्पः शब्दादेवोपजायते ॥ अविद्याविनिवृत्तिस्तु तत्त्वज्ञानोदये
भवेत् ॥ तत आवरणे क्षीणे क्षीयेते भ्रमसंशयौ ॥ १९ ॥ अनारब्धानि कर्माणि न-
श्यन्त्येव समंततः ॥ न चागामीनि जायन्ते तत्त्वज्ञानप्रभावतः ॥ २० ॥ प्रारब्धकर्मवि-
क्षेपाद्वासना तु न नश्यति ॥ सा सर्वतो बलवता संयमेनोपशाम्यति ॥ २१ ॥ संयमो
धारणाध्यानसमाधिरिति यत्त्रिकं ॥ यमादिपंचकं पूर्वं तदर्थमुपयुज्यते ॥ २२ ॥

ततः गुरोः सकाशात्

ब्रह्ममीमांसा

श्रवणपरिपाकेन

संचितानि =

त्ये

धारणाद्यर्थं =

ईश्वरप्रणिधानात्तु समाधिः सिध्यति ध्रुवं ॥ ततो भवेन्मनोनाशो वासनाक्षय एव च ॥ तत्व
ज्ञानेन मनोनाशो वासनाक्षय इत्यपि ॥ युगपत्त्रितयाभ्यासाज्जीवन्मुक्तिर्दृढा भवेत् । २४
विद्वत्संन्यासकथनमेतदर्थं श्रुतौ कृते ॥ प्राप्तसिद्धोयपवांशो यतः स्यात्तत्समाधने । २५
निरुद्धे चेतसि पुरा सविकल्पसमाधिना ॥ निर्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः
उत्तिष्ठते स्वतस्त्वाद्ये द्वितीये परबोधतः ॥ अन्ते व्युत्तिष्ठते नैव सदा भवति तन्मयः । २७
एवंभूतो ब्राह्मणः स्याद्वरिष्ठो ब्रह्मवादिनां ॥ गुणातीतः स्थितप्रज्ञो विष्णुभक्तश्च क
थ्यते ॥ २८ ॥ अतिवर्णाश्रमी जीवन्मुक्त आत्मरतिस्तथा ॥ एतस्य कृतकृत्यत्वाच्छा
स्त्रमस्मान्निवर्तते ॥ २९ ॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्य
र्थाः प्रकाशन्ते महात्मनः ॥ ३० ॥ इत्यादि श्रुतिमाननत कायेन मनसा गिरा ॥ सर्वावा
स्थासु भगवद्भक्तिरेवोपयुज्यते ॥ ३१ ॥ पूर्वभूमौ कृता भक्तिरुत्तरां भूमिमानयेत् ॥
अन्यथा विघ्नबाहुल्यात्फलसिद्धिः सुदुर्लभा ॥ ३२ ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशो
पि सः ॥ अनेकजन्मसंसिद्ध इत्यादि च वचो हरेः ॥ ३३ ॥ यदि प्राग्भवसंस्कारस्याविं

त्यक्त्वान्तकस्य च ॥ प्रागेव कृतकृत्यं स्यादाकाशफलपातवत् ॥३४॥ न ते प्रतिकृतार्थि
त्वाच्छास्त्रमार्गं बुभुत्स्यते ॥ प्राक्सिद्धसाधनाभ्यासाद्यैर्या भगवत्कृपा ॥३५॥ एवं
उत्तमभूमि
प्रारब्धेमिसिद्धावप्युत्तरोत्तरक्षमये ॥ विधेया भगवद्भक्तिर्लीलाविततानसिद्ध्यति ॥३६
जीवन्मुक्तिदशायां तु न भक्तेः फलकल्पना ॥ अद्वेष्टृत्वादिवत्तेषां स्वभावो भजनं हरेः
आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ॥ कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो
हरिः ॥३८॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ॥ इत्यादिवचनात्प्रेमभक्तो
ऽयमुत्तम उच्यते ॥३९॥ एतत्सर्वं भगवता गीताशास्त्रे प्रकाशितं ॥ अतो व्याख्यातुमेत
न्मम मन उत्सहते भृशं ॥४०॥ निष्कामकर्मानुष्ठानं मूलं मोक्षस्य कीर्तितं ॥ शोका
दिरासुरः पाप्मा तस्य च प्रतिबन्धकः ॥४१॥ यतः स्वधर्मविभ्रंशः प्रतिषिद्धस्य सेवने
फलाभिसंधिपूर्वा वा साहंकारा क्रिया भवेत् ॥४२॥ आविष्टः पुरुषो नित्यमेवमा
सुरपाप्मभिः ॥ पुमर्थलाभायोग्यः सन्लभते दुःखसंततिं ॥४३॥ दुःखस्वभावतो
द्वेष्यः सर्वेषां प्राणिनामिह ॥ अतस्तत्साधनं त्याज्यं शोकमोहादिकं सदा ॥४४॥ अ

उरुपराक्रमे
अचिंत्यशक्ति
मतीत्यर्थः =

उत्तरभूमिः =

गी॰टी॰
स॰प्र॰
३

नास्तिभवेत्तेननिमित्तं दुःखकारणं ॥ इत्यर्जुनशोकमोहादिकेनोपायेनहीयतां ॥ एव
माकांक्षयाविष्टंपुरुषार्थीनत्रसंवनरं ॥ तुर्वीयधियभुराहेदं भगवानुवाच अशोच्यानन्वशोचस्त्वं ।५६
तत्र अशोच्यानन्वशोचस्त्वमित्यादिना शोकमोहादिसर्वसंसारपापनिवृत्त्युपायोपदे
शेन स्वधर्मानुष्ठानात्पुरुषार्थः प्राप्यतामित्युपदेशः सर्वशास्त्रार्थसारः ॥ भगवदर्जु
नसंवादरूपाचाख्यायिका विद्यास्तुत्यर्था जनकयाज्ञवल्क्यसंवादादिवदुपनिष-
त्सु ॥ कथं प्रसिद्धमहानुभावोऽप्यर्जुनो राज्यगुरुपुत्रमित्रादिष्वहमेषां ममैते इ-
त्येवं प्रत्ययनिमित्तस्नेहनिमित्ताभ्यां शोकमोहाभ्यामभिभूतविवेकविज्ञानः स्वत-
एव क्षत्रधर्मे युद्धे प्रवृत्तोऽपि तस्माद्युद्धादुपरराम ॥ परधर्मं च भिक्षाजीवनादिकृ
त्यं प्रति प्रतिषिद्धं कर्तुं प्रवृत्ते ॥ तथा च महत्यनर्थे मग्नोऽभूत् ॥ भगवदुपदेशा
च्चेमां विद्यां लब्ध्वा शोकमोहावपनीय पुनः स्वधर्मे प्रवृत्तः कृतकृत्यो बभूवेति प्रश-
स्तेनेयं महाप्रयोजना विद्येति स्तूयते ॥ अर्जुनोपदेशेन चोपदेशाधिकारी द-
र्शितः ॥

५८

अपनेतु मिकतां त्यपनिनीषुः २   दूरीकृतस्य ५

धृतराष्ट्र ति = ३
जनमेजयं प्रति २
कृपायाः

अहिंसापरमो धर्मो भिक्षाशनं चेत्येवं लक्षणाया बुद्ध्या युद्धं वैमुख्यमर्जुनस्य श्रुत्वा स्वपुत्राणां स्वराज्यमप्रचलितमेव पार्थस्य स्वहृदये समर्थितराष्ट्रस्य हर्ष इति मित्वा ॥ ततः किं वृत्तमित्याकोशप्रपनिनीषुः संजयः तमप्रत्युक्तवानित्याह वैशंपायनः संजय उवाच ॥ कृपा ममेत्येवं इति व्यामोहनिमित्तः स्नेहविशेषः ॥ तया आविष्टस्वभावस्य तद्व्याप्तं ॥ अर्जुनस्य कर्मत्वं कृपायाश्च कर्तृत्वं वदता तस्या आगन्तुकत्वं सूचितं अत एव विषीदंतं स्नेहविषयीभूतस्वजनविच्छेदाशंका
संजयेन

॥ संजय उवाच ॥ तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं ॥ विषीदंतमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥ तम ॥

विषादस्य

निमित्तः शोककार्यरूपपर्यायश्चित्तव्याकुलीभावो विषादस्तं प्राप्नुवंतं ॥ अत्र विषादस्य कर्मत्वेन अर्जुनस्य कर्तृत्वेन च तस्यागन्तुकत्वं सूचितं ॥ अत एव कृपाविषादवशादश्रुभिः पूर्णे आकुले दर्शनाक्षमे च ईक्षणे यस्य तं ॥ एवमश्रुपातव्याकुलीभावाख्यकार्यद्वयजनकतया परिपोषं गताभ्यां कृपाविषादाभ्यामुद्विग्नमर्जुनं इदं सोपपत्तिकं वक्ष्यमाणं वाक्यमुवाच ॥ न तु उपेक्षितवान् ॥ मधुसूदन इति स्वयं दुष्टनिग्रहकर्ता अर्जुनं प्रत्यर्पितधैर्य

शोकमोहादिदुष्टनिग्रहकर्तृत्वं परित्राणाय साधूनामित्यादिना स्वस्य वक्ष्यति भगवानिति भावः

गी॰टी॰
म द्वि॰
१२

13

तदेव भगवतो वाक्यमवतारयति ॥ भगवानिति ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ॥ वैराग्यस्याथ मोक्षस्य षण्णां भग इतीङ्गना समग्रस्येति प्रत्येकं संबंधः ॥ मोक्षस्येति तत्साधनस्य ज्ञानस्य इंगना संज्ञा ॥ एतादृशो समग्रमैश्वर्यादिकं नित्यमप्रतिबंधेन यत्र वर्तते स भगवान् ॥ नित्ययोगे मतुप् ॥ तथा उत्पत्तिं च विनाशं च भूतानामागतिं गतिं ॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥ अत्र भूतानामिति प्रत्येकं संबध्यते ॥ उत्पत्तिविनाशशब्दौ तत्कारणस्याप्युपलक्षकौ । आगतिगती आगामिन्यौ संपदापदौ ॥ एतादृशो भगवच्छब्दार्थः श्रीवासुदेव एव यद्यपि वसति तदिति तथोच्यते ॥ इदं स्वधर्मात्पराङ्मुखत्वं कृपणत्वं मोहाश्रुपातादिरूपं कश्मलं शिष्टगर्हितं तत्त्वेन म

श्रीभगवानुवाच ॥ कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं । अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥

लिनं विषमे सभये स्थाने त्वा त्वां सर्वक्षत्रियप्रवरं ॥ कुतो हेतोः समुपस्थितं प्राप्तं किं मोक्षेच्छातः किं वा स्वर्गेच्छातः ॥ अथवा कीर्तीच्छात इति किंशब्देनाक्षिप्यते ॥ हेतुत्रयमपि निषेधति त्रिभिर्विशेषणैः ॥ अनार्यजुष्टं ॥ आर्यैर्मुमुक्षुभिर्नजुष्टं नसेवितं ॥ स्वधर्मेणाशयशुद्धिद्वारा मोक्षमिच्छद्भिरप्रक्षककषायैर्मुमुक्षुभिः कथं स्वधर्मस्त्याज्य इत्यर्थः ॥ संन्यासाधिकारी तु पक्वकषायो ग्रवहृयते अस्वर्ग्यं स्वर्गहेतुधर्मविरोधित्वात् ॥ न स्वर्गेच्छया सेव्यं ॥ अकीर्तिकरं कीर्त्यभावकरमपकीर्तिकरं वा न कीर्तीच्छया सेव्यं ॥ तथा च ॥ मोक्षकामैः स्वर्गकामैः कीर्तिकामैश्च वर्जनीयं तत्कामवत्त्वे

इन्द्रियाणां सामर्थ्यं तेजः = मनसः सामर्थ्यं तेजः = आदिशब्देन शरीरसामर्थ्यं = २

ननु बंधुस्नेनावेह्लण्ये जातेनाधैर्येण धनुरपि धारयितुमशक्नुवता मया किं कर्त्तुं शक्यमित्यत आ
ह। क्लैब्यमिति क्लैब्यं क्लीवभावमधैर्यं ओजस्तेज आदिभंगरूपं मा स्म गमः मा गाः हे पार्थ पृथा
तनय पृथया कुंत्या देवप्रसादलब्धे तनये वीर्यातिशयस्य प्रसिद्धत्वात् पृथातनयत्वेन
त्वं च क्लैब्यायोग्य इत्यर्थः॥ अर्जुनत्वेनापि तदयोग्यत्वमाह॥ नैतदिति त्वयि अर्जुने साक्षा
न्महेश्वरेणापि सह कृताहवे प्रख्यातमहाप्रभावेनोपपद्यते न युज्यते एतत् क्लैब्यमित्यर्थः॥

इति = ४
सर्वलकारार्थे
लुङ् द्यत्र माङि
लुङ् मेत्र रेल्ल
ङ् च मा माङ्यो
गे अटाटौ न
गमः गाः
मध्यमपुरुषः;

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते। क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप॥३॥

धारितेपनन्तदयोग्यत्वनिर्देशः॥ ननु न च शक्नोम्यवस्थातुं भ्रमतीव च मे मन इति पूर्वमेव मयो
क्तमित्याशंक्याह क्षुद्रमिति॥ हृदयदौर्बल्यं मनसो भ्रमणादिरूपमधैर्यं क्षुद्रत्वकारणात्वा
त् क्षुद्रं सुनिरसनं वा त्यक्त्वा विवेकेनापनीय उत्तिष्ठ युद्धाय सज्जो भव हे परंतप परं शत्रुं ता
पयतीति तथा संबोध्यते हेतुगर्भं॥३॥ ननु नायं स्वधर्मस्य त्यागः शोकमोहादिवशात्॥ किंतु
धर्मत्वाभावादधर्मत्वाच्चास्य युद्धस्य त्यागो मया क्रियत इति भगवदभिप्रायमप्रतिपद्यमान
स्यार्जुनस्याभिप्रायमवतारयति अर्जुनेति॥

संनद्य

शरैः

भीष्मं पितामहं द्रोणमाचार्यं संख्ये रणे इषुभिः सायकैः प्रतियोत्स्यामि प्रहरिष्यामि कथं न कथंचिद
पीत्यर्थः यतस्तौ पूजार्हौ कुसुमादिभिरर्चनयोग्यौ पूजार्हाभ्यां सह क्रीडास्थानेपि वाचापि हर्षफल
कमपि लीलायुद्धमनुचितं ॥ किंपुनर्युद्धे भैमीशरैः प्राणत्यागफलकं प्रहरणमित्यर्थः ॥ अरि
सूदन मधुसूदनेति संबोधनद्वयं शोकव्याकुलत्वेन पूर्वापरपरामर्शवैकल्यात् अतो न मधुसू
दनेत्यस्यार्थस्य पुनरुक्तत्वदोषः युद्धमात्रमपि यत्र नोचितं हे तत्र वध इति प्रतियोत्स्यामीत्यनेन
सूचितं ॥ अथवा पूजार्हौ कथं प्रतियोत्स्यामीति पूजार्हयोरेव विवरणं ॥ भीष्मं द्रोणं चेति ॥ द्रो
णाद्ब्राह्मणो भोज्य यदेव दत्तं यच्च दत्तं चेति वत्सबंधः ॥ अयं भावः ॥ दुर्योधनादयो नातुरस्तु त्वं भीष्म अग्रेकृता

अर्जुन उवाच ॥ कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ॥ इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन

द्रोणो युद्धाय सज्जी भवंति ॥ तत्र ताभ्यां सह युद्धं न तावद्धर्मः पूजादिवद्विहितत्वात् ॥ न चायमनि
षिद्धत्वादधर्मोपि न भवतीति वाच्यं गुरुं हुंकृत्य त्वं कृत्येत्यादिना शब्दमात्रेणापि गुरुद्रोहे यदाः निष्टफ
लत्वप्रदर्शनेन निषिद्धः तदा किं वाच्यं ताभ्यां सह संग्रामस्याधर्मत्वे निषिद्धत्वे चेति ॥४॥ ननु भी
ष्मद्रोणयोः पूजार्हत्वं गुरुत्वेनैव ॥ एवमन्येषामपि कृपादीनां ॥ न च तेषां गुरुत्वेन स्वीकारः
सांप्रतमुचितः ॥ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथप्रतिपन्नस्य परित्यागो वि
धीयत इति स्मृतेः ॥ तस्मादेषां युद्ध एवं राज्यावलिप्तानामन्याय्यराज्यग्रहणेन शिष्यद्रोहेण च उन्मार्ग १५
कार्याकार्यविवेकशून्यानामन्यथा तिष्ठतां वध एव श्रेयानिति त्वाशंक्याह ॥ गुरूनिति ॥५॥

गुरून्हत्वा परलोकस्तावदस्त्वेव ॥ अस्मिंस्तु लोके तेषु हतेषु राज्यानां नोऽन्यपादीनां निषिद्धं भैक्षमपि भोक्तुं श्रेयः
प्रशस्यतरमुचितं तेन तु तद्वधेन राज्यमपि क्षत्रियस्येति धर्मेऽपि युद्धे हननिमात्रफलत्वं गुरुहीनत्वात्पापमारोप्य प्युक्तते
न त्वं लिप्सत्वादिना तेषां गुरुत्वाभाव इत्याशंक्याह ॥ महानुभावानिति ॥ महाननुभावः श्रुताध्यय
नतपआचारादिनिबंधनः प्रभावो येषां तान् ॥ तथा च कालकामादयोऽपि यैर्वशीकृतास्तेषां पुराणातिश
यशालितानां तावल्लिप्सत्वादिदूषणापसंश्लेष इत्यर्थः ॥ हि महानुभावानित्येकं वा पदं ॥ हिमं जाड्यम
पहन्तीति हिमहा आदित्योऽग्निर्वा तस्येवानुभावः सामर्थ्यं येषां तान् तथा चातितेजस्वित्वान्न पामवलि
प्सत्वादिदोषो नास्त्येव धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं ॥ तेजीयसां न दोषाय वह्नेः सर्वभु
जो यथेत्युक्तेः ॥ ननु यदार्थलुब्धाः सन्तो युद्धे प्रवृत्तास्तदैषां विक्रीतात्मनां कुतस्त्यः पूर्वोक्तो महानुभावत्वं ॥

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके । हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान्रुधिरप्रदिग्धान् ॥ ५ ॥

तथा चोक्तं भीष्मेण युधिष्ठिरं प्रति ॥ अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ॥ इति सत्यं महाराज
बद्धोऽस्म्यर्थेन कौरवैरित्याशंक्याह ॥ हत्वेति ॥ अर्थलुब्धा अपि ते मदपेक्षया गुरव एव भवन्त्येवेति पुनर्गुरु
ग्रहणेनोक्तं तुशब्दोऽप्यर्थे ॥ ईदृशानपि गुरून्हत्वा भोगानेव भुंजीय न तु मोक्षं लभेयं भुज्यन्त इति भो
गा विषयाः कर्मणि व्रजन्ते च भोगा इहैव न परलोके ॥ इहापि च रुधिरप्रदिग्धा इव अपयशोव्याप्तत्वे
नात्यन्तजुगुप्सिता इत्यर्थः ॥ यदीहाप्येवं तदा परलोकदुःखं कियद्वर्णनीयमिति भावः अथवा गु
रून्हत्वार्थकामात्मकान्भोगानेव भुंजीय न तु धर्ममोक्षाविति अर्थकामपदस्य भोगविशेषणात्

अर्जुनः
अर्हं कादिना
तेजो:
निन्दिता:

भुज्यन्त इति भोगा इत्यर्थी इति कर्मणि घञ् भावे ... : = २

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः।

यत्राहवे बुध्यन्ते भूम्यर्थे अपराङ्मुखाः अक्रूरैरायुधैर्यान्ति ते स्वर्गं योगिनो यथेति याज्ञवल्क्य स्मृतेश्च॥ तत्त्वज्ञानरहितपरिव्राजः स्वाश्रमधर्मानुष्ठायिनो यथा स्वर्गं यान्ति न पार्थरोहतास्त्रप्रि

गी॰ टी॰ म॰ द्वि॰ १५

ननु भैक्षाशनस्य क्षत्रियं प्रति निषिद्धत्वात्॥ युद्धस्य च विहितत्वात्॥ स्वधर्मत्वेन युद्धमेव तव श्रेयस्करमि
त्याशंक्याह॥ न चैतदपि न जानीमो भैक्षयुद्धयोर्मध्ये कतरन्नोऽस्माकं गरीयः श्रेष्ठं॥ किं भैक्षं हिं
साशून्यत्वात्॥ उत युद्धं स्वधर्मत्वादिति॥ इदं न विद्मः आरब्धेऽपि युद्धे यद्वा वयं जयेमातिशयीमहि यदि
वा नोऽस्मान् जयेयुर्धार्तराष्ट्राः उभयोः साम्यपक्षोऽप्यर्थात्सूचितः किं च जातोऽपि जयो नः फलतः परा
जय एव यतो यानेव हत्वा जीवितुमपि वयं नेच्छामः किं पुनर्विषयानुपभोक्तुं॥ त एवावस्थिताः
संमुखे धार्तराष्ट्राः सेवं धितो भीष्मद्रोणादयः सर्वेऽपि तस्माद्भैक्षयुद्धयोः श्रेष्ठत्वेन संदिग्धमित्यर्थः॥ न
ह्येवं प्रोक्तेन ग्रन्थेन संसारदोषनिरूपणादधिकारिविशेषणान्युक्तानि तत्र न च श्रेयोऽनुपश्यामि ह
त्वा स्वजनमाहवे इत्यत्र रागो हत एवापि विरागस्समानयोगक्षेमत्वोक्तेर्वत्यक्ष्ये योऽस्य द्वैनेव प्रयत्यादि।

पूर्वाध्यायेन

15

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः॥ यानेव हत्वा न जिजीविषा
मस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः॥६॥२

श्रुतिसिद्धं यत्क्षयो मोक्षाख्यमनपायं मुख्यं श्रेयः तदिति तदश्रेयः इति नित्यानित्यवस्तुविवेको दर्शितः
न कांक्षे विजयं कृष्णेत्यत्रैहिकफलविरागः॥ अपि त्रैलोक्यराज्यस्य हेतोरित्यत्र पारलौकिकफल
विरागः॥ नरके नियतं वास इत्यत्र स्थूलदेहातिरिक्त आत्मा॥ किं नो राज्येनेति व्याख्यातवर्त्मना श
मः॥ किं भोगैरिति दमः॥ यद्यप्येते न पश्यन्तीत्यत्र निर्लोभतानन्तरं भवेदित्यत्र तितिक्षा इति प्र
थमाध्यायार्थः सन्याससाधनसूचनं॥ अस्मिंस्त्वध्याये श्रेयो भोक्तुं भैक्षमपीत्यत्र द्वाचर्योपल
क्षितः संन्यासः प्रतिपादितः गुरूपसदनमिदानीं प्रतिपाद्यते समधिगतसंसारदोषजातस्याति
तरां निर्विण्णस्य विधिवद्गुरुमुपसन्नस्यैव विद्याग्रहणे अधिकारात्॥६॥ ॥ श्रीरामाय नमः

निरूपितः

निरूपितः

भि

विरक्तस्य

१५

गुरुसमीपगमनम्

तदेवं भीष्मादिसंकटवशात् उत्थायाथ भिक्षाचर्यं चरंतीति श्रुतिसिद्धं भिक्षाचर्येण जीवनस्याभिलाषेण प्र-
दर्शितविधिकं गुरूपसत्तिमपि तत्संकटव्याजेनैव दर्शयति कार्पण्येति यो ऽल्पः स्वल्पामपि वित्तक्षतिं न क्ष-
मते स कृपण इति लोके प्रसिद्धस्तद्वद्धनादिविलोभैर्नात्मविद्याप्राप्तपुरुषार्थितया कृपणो भवति ॥ यो
वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः ॥ तस्य भावः कार्पण्यं तच्चानात्माध्यास-
वत्तन्निमित्तोऽस्मिन् जन्मन्येत एव मदीयाः तेषु हतेषु किं जीवितेनेत्यभिनिवेशाद्रूपो ममतालक्षणो

कार्पण्यदोषोपहतस्वभावः । पृच्छामि त्वां धर्मसंमूढचेताः ॥ ॥ याम

दोषस्तेनोपहतस्तिरस्कृतः स्वभावः क्षात्रो युद्धोद्योगलक्षणो यस्य स तथा धर्मे विषये निर्णायकश्रु-
मार्गादर्शनात् संमूढं किं मे तेषां वधो धर्मः किमेतत्परिपालनं धर्मः तथा किं पृथिवीपरिपालनं
धर्मः किं वा यथावस्थितोऽरण्यनिवास एव धर्म इत्यादिसंशयैर्व्याप्तं चेतो यस्य स तथा न चै-
तद्विद्मः कतरन्नो गरीय इत्यत्र व्याख्यातमेतत् ॥ एवंविधः स ॥ ॥ ॥

सपक्षमाशके हेतौ जिज्ञासा ६

वेदमनुतज्योतिष्टोमादिसमुद्भूतस्वर्गादेः क्षयातिशयौ = ६

नन्वहं त्वां किमिदानीं पृच्छामि श्रेय इत्यत्र वैयर्थ्यं गतः ॥ अतो यन्निश्चितमैकान्तिकमात्यन्तिकं च श्रेयः परमपुम
र्थभूतं फलं स्यात्तन्मे मह्यं ब्रूहि साधनानन्तरमवश्यंभावित्वमैकान्तिकत्वं ॥ जातस्याविनाशश्चात्यन्ति
कत्वं यथा रोगविषये कृते कदाचिद्रोगानिवृत्तिर्न भवेदपि जातापि च रोगनिवृत्तिः पुनरपि रोगोत्प
त्त्या विनाश्यते ॥ एवं कृतेऽपि यागे प्रतिबन्धवशात्स्वर्गो न भवेदपि जातोऽपि स्वर्गो दुःखाक्रान्तो नश्य
ति चेति नैकान्तिकत्वमात्यन्तिकत्वं वा तयोः तद्रहितं दुःखत्रयाभिघाताज्जिज्ञासा तदुपघातके हेतौ
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावादिति ॥ दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः

यागादि निरता

दुःखनाशके

रोगनिवृत्ति स्वर्गयोः = २

दुःखत्रय

ऐकान्तिका आत्यन्तिको न भवति =

यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे ॥ शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नं ७ ॥

16

दृष्टानुश्रविकाभ्यां विलक्षणः १

तद्विपरीतः श्रेयान्व्यक्ताव्यक्तज्ञविज्ञानादिति च ॥ ननु त्वं मम सखा न तु शिष्योऽतः तत्राह ॥ शि
ष्यस्तेऽहमिति ॥ त्वदनुशासनयोग्यत्वादहं तव शिष्य एव भवामि न सखा ॥ स्वतन्त्रज्ञानत्वात्त्व
त्तस्त्वां प्रपन्नं शरणागतं मां शाधि शिक्षय करुणया न त्वशिष्यत्वशंकयोपेक्षणीयोऽह
मित्यर्थः एतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं ॥ भृगुर्वै
वारुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेत्यादिगुरूपसत्तिप्रतिपादकश्रुत्यर्थो

७

८

व्यक्तं महदादि । अव्यक्तं प्रधानं । ज्ञः पुरुषः तेषां विवेकेन ज्ञानं विज्ञानं सम्यग्ज्ञानम् ।

दृ = २

शोकापनोदं कि पापाः कर्तुं

ननु स्वयमेव त्वं श्रेयो विचारय श्रुतमपत्रोसि किं परशिष्यत्वेनेत्यत आह न हीति ॥ यच्छोकं यः प्राप्नं सन्तं क्रीं मम
शोकमपनुदे त्विवारयेत्तन्न पश्यामि ॥ हि यस्मात् न स्मात्मांशाधीतिशो हं भगवः शोचामितं मो भगवा।
ञ्छोकस्य पारं तारयत्विति श्रुत्यर्थोदर्शितः शोकान् अपनोदे कोदोष इत्याशंक्याह शोषणमाह ॥ इंद्रि
याणामुच्छोषणमिति ॥ सर्वदा संतापकरमित्यर्थः ॥ ननु युद्धे प्रयतमानस्य तव शोकनिवृत्तिर्भवि
ष्यति जेष्यसि चेत्तदा राज्यप्राप्त्या इतरथा च स्वर्गप्राप्त्या द्वाविमौ पुरुषौ लोक इत्यादि धर्मशास्त्रादित्या।
शंक्याह ॥ अवाप्येत्यादिना ॥ शत्रुवर्जितं समृद्धं सपत्नं च राज्यं तथा सुराणामाधिपत्यं हिरण्यगर्भ

नहि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां ॥ अवाप्य भूमावस
पत्नमृद्धं । राज्यं सुराणामपि चाधिपत्यं ॥ ८ ॥ [illegible] राम ॥ ॥

त्वपर्यंतमेश्वर्यमवाप्यस्थितस्यापि मम यच्छोकमपनुद्यात्तन्न पश्यामीत्यन्वयः ॥ तद्यथेह कर्मचितो लो
कः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति श्रुतेः ॥ यत्कृतकं तदनित्यमित्यनुमानात् ॥
प्रत्यक्षेणापि ऐहिकानां विनाशदर्शनाच्च ॥ नैहिकआमुत्रिको वा भोगः शोकनिवर्तकः ॥ किं तु
स्वसत्ताकालेपि पारतंत्र्यादिना विनाशकालेपि विच्छेदात् शोकजनक एवेति न युद्धं शोकनिवृ
त्तये श्रेयमित्यर्थः ॥ एतेनैहामुत्रभोगविरागोधिकारिविशेषणत्वेन दर्शितः ॥ ८ ॥ राम

एतः सदोषभो
गजनकस्=२

17

तदनंतरमर्जुनः किं कृतवानिति धृतराष्ट्राकांक्षायां ॥ संजय उवाच ॥ एवमिति गुडाकेशो जि
ताल्लस्य परंतपः ॥ शत्रुतापनोऽर्जुनः हृषीकेशं सर्वेंद्रियप्रवर्तकत्वेनांतर्यामिनं गोविंदं गां
वेदलक्षणां वाणीं विंदतीति श्रुत्या सर्ववेदोपादानत्वेन सर्वज्ञं प्रत्यादौ एवं कथं भीष्ममहं ९
संख्य इत्यादिना युद्धस्वरूपायोग्यतामुक्त्वा तदनंतरं न योत्स्य इति युद्धफलाभावं चोक्त्वा तू

संजय उवाच ॥ एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः
न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ॥९॥

ष्णीं बभूव बाह्येंद्रियव्यापारस्य युद्धार्थं पूर्वं कृतस्य निवृत्त्या निर्व्यापारो जात इत्यर्थः स्वभावतो जि
ताल्लस्य सर्वशत्रुरूपेन च तस्मिन्नागंतुकमालस्यमतापकत्वं च नास्पदमाधास्यतीति द्योतयितुं
हस्याहः गोविंदहृषीकेशपदाभ्यां सर्वज्ञसर्वसाक्षित्वसूचकाभ्यां भगवतस्तन्मोहापनोदनसा

ता

स्थिति

एवं युद्धमुपेक्षितवत्यर्जुने भगवान्नोपेक्षितवानिति धृतराष्ट्रं प्रति सञ्जय आह ॥ सेनयोरुभयोर्म
ध्ये युद्धोद्यमेनागत्य तद्विरोधिनं ॥ विषादं मोहं प्राप्नुवन्तं तमर्जुनं प्रहसन्निव अननुचिताचरणप्रका
शनेन लज्जाम्बुधौ मज्जयन्निव हृषीकेशः सर्वान्तर्यामी भगवान्निदं वक्ष्यमाणमशोच्यानित्यादि
वचः परमगंभीरार्थमनुचिताचरणप्रकाशकमुक्तवान् ॥ न तूपेक्षितवानित्यर्थः ॥ अनुचिता
चरणप्रकाशनेन लज्जोत्पादनं प्रहासः लज्जा च दुःखात्मिकेति द्वेषविषय एव सुखः ॥ अर्जुन
स्य तु भगवत्कृपाविषयत्वादनुचिताचरणप्रकाशनस्य च विवेकोत्पत्तिहेतुत्वादेकदलाभावे

तमुवाच हृषीकेशः प्रहसन्निव भारत ॥ सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥

तेनांशेनायं प्रहास इति कथयितुमिवशब्दः लज्जामुत्पादयितुमिव विवेकमुत्पादयितुमर्जुन
स्यानुचिताचरणं भगवता प्रकाश्यते ॥ लज्जोत्पत्तिस्तु नांतरीयकतया स्तु मास्तु वेति न विवक्षिते
ति भावः ॥ यदि हि युद्धारंभात्प्रागेव गृहे स्थितो युद्धमुपेक्षेत न तदानानुचितं कुर्यात् ॥ महता संरं
भेण तु युद्धभूमावागत्य तदुपेक्षणमतीवानुचितमिति कथयितुं सेनयोरित्यादि विशेषणं ॥ एत

अनुचिताचरणप्रकाशनेन स्राविनाभूतया = ३

साधारणासाधारणात्

तत्रार्जुनस्य युद्धाख्ये स्वधर्मे स्वतो जातापि प्रवृत्तिर्द्विविधेन मोहेन तन्निमित्तेन च शोकेन प्रतिबद्धेति द्विविधमोहस्य निराकरणीयः तत्रात्मनि स्वप्रकाशपरमानंदरूपे सर्वसंसारधर्मासंसर्गिणि स्थूलसूक्ष्मशरीरद्वयतत्कारणाविद्याख्योपाधित्रयाविवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वात्मधर्मत्वादिप्रतिभासरूप एकः सर्वप्राणिसाधारणः ॥ अपरस्तु युद्धाख्ये स्वधर्मे हिंसादिबाहुल्येनाधर्मत्वप्रतिभासरूपो ऽर्जुनस्यैव करुणादिदोषनिबंधनो ऽसाधारणः । एवमुपाधित्रयविवेकेन शुद्धात्मस्वरूपबोधः प्रथमस्य निवर्तकः सर्वसाधारणः द्वितीयस्य तु हिंसादिमत्त्वेपि युद्धस्य स्वधर्मत्वेनाधर्मत्वाभावबोधो ऽसाधारणः शोकस्य तु कारणनिवृत्त्यै-

श्रीभगवानुवाच ॥ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥ ११ ॥

२ शोकनिवृत्तौ

व निवृत्तेर्न पृथक् साधनापेक्षेत्यभिप्रेत्य क्रमेण मोहद्वयमपनुदन् ॥ श्रीभगवानुवाच । अशोच्येति अशोच्यान् शोचितुमयोग्यानेव भीष्मद्रोणादीनात्मसहितान् त्वंपरितोपिसन् अन्वशोचः अनुशोचितवानसि ते म्रियंते मन्निमित्तमहं तैर्विनाभूतः किं करिष्यामि राज्यसुखादिनेत्येवमर्थकेन दृष्ट्वेमं स्वजनमित्यादिना ॥ तथा चाशोच्ये शोच्यभ्रमः पश्वादिसाधारणत्वात्तु पंडितस्यानुचित इत्यर्थः ॥ तथा कुतस्त्वा कश्मलमित्यादिना मद्वचनेनानुचितमिदमाचरितं मयेति विमर्शप्राप्तेपि त्वं स्वयं प्राज्ञो ऽसि सन् प्रज्ञानामवादान् बुद्धिवक्रमनुचितादृशान् कथं भीष्ममहं संख्ये इत्यादीन् भाषसे वदसि न तु लज्जया तूष्णीं भवसि ॥ अतः परं कि-

गी॰ टी॰ म॰ हि॰ १८

१८

प्रज्ञाशब्देन तत्फलतया स्थूलरात = १
प्रज्ञावत्सु लक्षणातस्तेषां = २

किंतु

त्तु च कार॥ तथा चाधर्मे धर्मत्वभ्रान्तिर्धर्मे चाधर्मत्वभ्रान्तिरस्माथावगीनवातिपंडितस्य नोचितेतिभावः
प्रज्ञावतां पंडितानां वादान् भाषसे परं तु ते बुध्यस्वेति वा भाषणापेक्षयाऽनुशोचनस्य प्राक्कालत्वादती
तनिर्देशः भाषणस्य तु तदुत्तरकालत्वेनाव्यवहितत्वाद्वर्तमानत्वनिर्देशः छांदसेन तिङ्व्यत्ययेनानुशो

अनुशोचनस्य =

चसीति वर्तमानत्वेन वा व्याख्येयं॥ ननु तेषु विच्छेदे शोको नानुचितः वसिष्ठादिभिर्महाभागैरपि कृतत्वादि
त्याशंक्याह॥ गतासूनिति ये पंडिताः विचारजन्यात्मतत्त्वज्ञानवंतः॥ ते गतप्राणानगतप्राणांश्च तेषु
त्वेन कल्पितान्देहान्नानुशोचंति प्रेते मृताः सर्वोपकरणपरित्यागेन मृताः किं कुर्वंतीति कनिष्ठंति प्रेते च
जीवंतो वा तेषु विच्छेदेन कथं जीविष्यंतीति न व्यामुह्यंति॥ समाधिसमये तत्प्रतिभासाभावात्॥ व्युत्थान
समये तत्प्रतिभासेपि मृषात्वेन निश्चयात् तर्हि रज्जुतत्त्वसाक्षात्कारेण सर्पभ्रमेऽपनीते तन्निमित्तभय

गतासूनगतासूंश्च नानुशोचंति पंडिताः॥११॥

कंपादि संभवति॥ तत्रापि ज्ञानापहतेंद्रियस्य कदाचित्कुडे तिक्तताप्रतिभासेपि तिक्तार्थितया तत्र प्रवृत्तिर्न सं
भवति मधुरत्वनिश्चयस्य बलवत्त्वात्॥ एवमात्मतत्त्वरूपाज्ञाननिवर्तनत्वाच्छोकभ्रमस्य तत्स्वरूपज्ञा

तस्यात्मतत्त्वरूपाज्ञा
नस्य कार्यभूतः = १

नेन तदज्ञानेऽपनीते तत्कार्यभूतः शोकभ्रमः कथमवतिष्ठेतेति भावः वसिष्ठादीनां तु प्रारब्धकर्म
प्राबल्यात्तथा तथानुकरणं तु शिष्टाचारतयाऽन्येषामनुष्ठेयतामापादयति॥ शिष्टैर्हि मिथ्याबुद्ध्या
नुष्ठीयमानस्यालौकिकव्यवहारस्यैव तदाचारत्वात्॥ अन्यथा निष्ठीवनादेरप्यनुष्ठानप्रसं
गादिति द्रष्टव्यं॥ यस्मादेवं तस्मात्त्वमपि पंडितो भूत्वा शोकं माकार्षीरित्यभिप्रायः॥११॥ नाम

मुखव्हाराकपापा
तनम = १

गी॰टी॰
म॰द्वि॰
१९

नत्वेवेत्याद्येकविंशतिश्लोकैरशोच्यानन्वशोचस्त्वमित्येतस्य विवरणं क्रियते ॥ स्वधर्ममपि चावेक्ष्येत्यादिषड्भिः श्लोकैः प्रज्ञावादांश्च भाषसे इत्यस्य मोहः इत्यस्य पृथक्प्रयत्ननिराकर्तव्यत्वात् ॥ तत्र स्थूलशरीरादात्मानं विविक्तं नित्यत्वं साधयति ॥ नत्विति तुशब्दो देहादिभ्यो व्यतिरेकं सूचयति ॥ यथा अहं इतः पूर्वं जातु कदाचिदपि नासमिति नैव अपि तु आसमेव

नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ॥ न चैव न भविष्यामः सर्वे वयमतः परं ॥ १२ ॥

अनादिः सान्तः प्रागभावः उत्पत्तेः पूर्वं कार्यस्य

व तथा त्वमप्यासीः ॥ इमे जनाधिपाश्चासन्नेव एतेन प्रागभावाप्रतियोगित्वं दर्शितं ॥ न चास वैव वयमहं इमे जनाधिपाश्चातः परं न भविष्याम इति न अपि तु भविष्याम एवेति ध्वंसाप्रतियोगित्वमुक्तं ॥ अतः कालत्रयेऽपि सत्ताप्रतियोगित्वादात्मनो नित्यत्वेनानित्याद्देहाद्वैलक्षण्यं सि

सादिरनन्तः प्रध्वंसः उत्पन्नानन्तरं कार्यस्य=२

अथ वादे नरिरस्य तं न मम विव ति =

ननु देहमात्रं चैतन्यविशिष्टमात्मेति लौकायतिकाः ॥ तथा च स्थूलोऽहं गौरोऽहं गच्छामि चेत्यादिप्रत्ययस्य प्र
तीतिनां प्रामाण्यमनतयोदितं भविष्यति ॥ अतः कथं देहादात्मनो व्यतिरेकः ॥ व्यतिरेकेऽपि कथं वा जन्म
विनाशशून्यत्वं ॥ जातो देवदत्तो मृतो देवदत्त इति प्रतीतेर्देहजन्मनाशाभ्यां सहात्मनोऽपि जन्मविनाशो
पपत्तेरित्याशंक्याह देहिन इति । देहाः सर्वे भूतभविष्यद्वर्तमाना जगत्यंत्र्युलवर्तिनोऽस्य सन्तीति देही ॥
एकस्यैव विभुत्वेन सर्वदेहयोगित्वात् सर्वत्र चेष्टोपपत्तेर्न प्रतिदेहमात्मभेदे प्रमाणमस्तीति सूचयि
तुमेकवचनं ॥ सर्वे वयमिति वहुवचनं तु सर्वत्र देहभेदानुवृत्त्या न त्वात्मभेदाभिप्रायेणेति न दोषः ॥ त
स्य देहिन एकस्यैव सतोऽस्मिन्वर्तमाने देहे यथा कौमारं यौवनं जरेत्यवस्थात्रयं परस्परविरुद्धं भवति । न
तु तद्भेदेनात्मभेदः ॥ य एवाहं बाल्ये पितरावन्वभूवं स एवाहं वार्धके प्रणप्तॄननुभवामीति दृढतरप्रत्य

पुत्रपौत्रान्

देहिनोऽस्मिन्यथा देहे ॥ कौमारं यौवनं जरा ॥ ॥ ॥

स्मरणात्

भिज्ञानात् ॥ अन्यनिष्ठसंस्कारस्यान्यत्रानुसंधानाजनकत्वात् ॥ तथा तेनैव प्रकारेण विकृतस्यैव सत आ
त्मनो देहांतरप्राप्तिः ॥ एतस्माद्देहादत्यंतविलक्षणदेहप्राप्तिः ॥ स्वप्ने योगैश्वर्ये च तत्र देहभेदानुसंधानेऽपि
स एवाहमिति प्रत्यभिज्ञानात् ॥ तथा च यदि देह एवात्मा भवेत् ॥ तदा कौमारादिभेदेन देहे भिद्यमाने
प्रतिसंधानं न स्यात् ॥ अथ च कौमाराद्यवस्थानामत्यंतवैलक्षण्येऽप्यवस्थावतोऽपि देहस्य यावद्द्रव्यभा

इति सूत्रम् =

वित्वं तु स्थितिरिति न्यायेनैक्यं ब्रूयात् ॥ तदापि स्वप्नयोगैश्वर्ययोर्देहधर्मिभेदे प्रतिसंधानं न स्यादि

हे नो:

त्युभयोरुदाहरणं । अतो मरुमरीचिकादावुदकादिबुद्धेरिव स्थूलोऽहमित्यादिबुद्धेरपि भ्रमत्वमवा
श्यमभ्युपेयं वाधस्योभयत्रापि तुल्यत्वात् ॥ एतच्च न जायते इत्यादौ प्रपंचयि ॥ ॥ ॥ श्रीरामचंद्राय नमः

पदितु = ४

निरस्तः

गी॰ टि॰
म॰ द्वि॰
२॰

ष्यते ॥ एतेन देहाद्व्यतिरिक्तो देहेन सह नोत्पद्यते विनश्यति चेति पक्षोऽपि प्रत्युक्तः ॥ तत्रावस्थाभेदे प्रत्यभि-
ज्ञोपपत्तावपि धर्मिणो देहस्य भेदादेकप्रत्यभिज्ञानुपपत्तेः ॥ अथवा यथा कौमाराद्यवस्थाप्राप्ति-
रविकृतस्यात्मन एकस्यैव तथा देहान्तरप्राप्तिः ॥ एतस्माद्देहादुत्क्रान्तौ तत्र स एवाहमिति प्रत्यभि-
ज्ञानाभावेऽपि जातमात्रस्य हर्षशोकभयादिसंप्रतिपत्तेः पूर्वसंस्कारजन्यायाः दर्शनात् ॥ अन्यथा
स्तनपानादौ प्रवृत्तिर्न स्यात् ॥ तस्याः इष्टसाधनतादिज्ञानजन्यत्वस्येष्टमात्रजन्यत्वस्य वाभ्यु-
पगमात् ॥ तथा च पूर्वापरदेहयोरात्मैक्यसिद्धिः ॥ अन्यथा कृतनाशाकृताभ्यागमप्रसंगादि-
त्यन्यत्र विस्तरः ॥ अथवा देहिन एकस्यैव तव यथा क्रमेण देहावस्थोत्पत्तिविनाशयोर्न भेदो नि-
त्यत्वात् ॥ तथा युगपत्सर्वदेहान्तरप्राप्तिरपि नैकस्यैव विभुत्वात् ॥ मध्यमपरिमाणत्वे साव-

आत्मनो एककार्यत्वे सति

सर्वत्र चेष्टोपपत्तिकल्पत्वात् तथा देहान्तरप्राप्तिः ॥ धीरस्तत्र न मुह्यति ॥ १३ ॥

यवत्वेन नित्यत्वायोगात् ॥ अणुत्वे सकलदेहव्यापिसुखाद्यनुपलब्धिप्रसंगात् । विभुत्वे निश्चि-
ते सर्वत्र दृष्टकार्यत्वात् सर्वशरीरेष्वेक एवात्मा त्वमिति निश्चितोऽर्थः ॥ तत्रैवं सति वध्यघातकभेद-
कल्पनया त्वमधीरत्वान्मुह्यसि धीरस्तु विद्वान्न मुह्यति अहमेषां हन्ता ममैते वध्या इति भेददर्शना-
भावात् ॥ तथा च विवादगोचरापन्नाः सर्वदेहाः एकभोक्तृकाः ॥ देहत्वात्त्वद्देहवदिति ॥ श्रुतिर-
पि ॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेत्यादि ॥ एतेन यदाहुर्देहमात्रमात्मेति
चार्वाकाः ॥ इन्द्रियाणि मनः प्राणश्चेति तदेकदेशिनः क्षणिकं विज्ञानमिति सौगताः ॥ देहाति-
रिक्तः स्थिरो देहपरिमाण इति दिगम्बराः ॥ मध्यमपरिमाणस्य नित्यत्वानुपपत्तेर्नित्योऽणुरात्मेत्येकदे-

प्रवृत्तेः

20

दृष्टकार्यस्य सत्त्वात् = २

विवादास्पदप्राप्ताः

एकेन योक्ता आत्मा येषु ते = ४

बौद्धमतवादिनः

नत्वात्मनोनित्यत्वेविभुत्वेचनविवदामः॥ प्रतिदेहमेकत्वंतुनसहामहे॥ तथाहिबुद्धिसुखदुःखे

संस्कारः

च्छाद्वेषप्रयत्नधर्माधर्मभावानांरव्यनवविशेषगुणावंतः॥ प्रतिदेहंभिन्नाएवनित्याविभवश्चात्मान

इतिवैशेषिकामन्यंते॥ इममेवचपक्षंतार्किकमीमांसकादयोपिप्रतिपन्नाः सांख्यास्तुविप्रतिप

आत्मनोनेकत्वाभावे

द्यमानानामप्यात्मनोगुणवत्वेप्रतिदेहंभेदेनविप्रतिपद्यंते॥ अन्यथासुखदुःखादिसंकरप्रसंगा

नानात्वेसति

त्॥ तथाचभीष्मादिभिन्नस्यममनित्यत्वेविभुत्वेपिसुखदुःखादियोगित्वात्॥ भीष्मादिवंयुदेह

विच्छेदेसुखवियोगोदुःखसंयोगश्चस्यादिति॥ शोकमोहौनानुचिन्तावित्यर्जुनाभिप्रायमाशंक्य

लिंगशरीरविवेकमाह॥ मात्रेतिंमीयंतेविषयाआभिरितिमात्राइंद्रियाणि॥ तासांस्पर्शाविषयैः

मात्रास्पर्शास्तुकौंतेय॥ शीतोष्णसुखदुःखदाः॥॥

संबंधाः॥ तत्रद्वेषयाकारांतःकरणपरिणामावा॥ तेआगमापायिनउत्पत्तिविनाशवंतोंऽतःकर

णस्यैवशीतोष्णादिद्वारासुखदुःखदाः॥ नतुनित्यस्यविभोरात्मनःतस्यनिर्गुणत्वान्निर्विकारत्वाच्च

गुणगुणिनोः

नहिनित्यस्यानित्यधर्माश्रयत्वंसंभवति॥ धर्मधर्मिणोरभेदात्संबंधांतरानुपपत्तेः साक्ष्यस्यसा

क्षिधर्मत्वानुपपत्तेश्च॥ तदुक्तं॥ नैर्मल्याद्विक्रियादुःखीसाक्षित्वान्नाविकारिणः॥ धीविक्रियास

मतेविनाविक्रियां

हस्राणांसाक्ष्यतोहमविक्रियइति॥ तथाच॥ सुखदुःखाद्याश्रयीभूतांतःकरणभेदादेवसर्वव्य

वस्थोपपत्तेर्न निर्विकारस्यसर्वभासकस्यात्मनोभेदेमानमस्तिसद्रूपेणस्फुरणरूपेणचसर्वत्रा

नुगमात्॥ अंतःकरणस्यतावत्सुखदुःखादिजनकत्वमुभयवादिसिद्धं॥ तत्रसमवायिका

नैयायिकादिवेदान्तिनोः = ८

उपादानत्वस्यसुखदुःखादिरूपस्य

मुख्यत्वात्मनसः = ८

नैयायिका आत्मा नं सुखदुःखादि समवायिकारणमविवेकेन मन्यन्ते ऽन्तःकरणं तु सिद्धान्तिनः अतो नैयायिकानु(म)तिसिद्धान्तिना युक्तिरुच्यते अन्तःकरणस्य सुखदुःखादि कारणत्वं सर्वसंमतं तत्र किंविधं कारणमिति विशेषजिज्ञासायां प्रथमोपस्थितत्वात् तस्य समवायिकारणत्वमेव कल्प्यं न तु निमित्तत्वं समवायसंबन्धमवायि निमित्तनामधेयं पश्चादुपस्थितत्वात् आत्मनः समवायिकारणत्वं श्रुति युक्तिविरुद्धमालोच्य शरीरस्थ

रणत्वस्यैवाभ्यर्हितत्वात्तदेव कल्पयितुमुचितं न तु समवायिकारणान्तरानुपस्थितौ निमित्तत्वमात्रं ॥ तथा च कामः संकल्प इत्यादिश्रुतिः एतत्सर्वं मन एवेति कामादि सर्वविकारोपादानत्वमभेदनिर्देशान्मनस आह ॥ आत्मनस्तु स्वप्रकाशज्ञानानंदरूपत्वस्य श्रुतिभिर्बोधनात्तत्कामाद्याश्रयत्वं ॥ अतो वैशेषिकादयो भ्रान्ता एवात्मनो विकारित्वभेदं चांगीकृतवंत इत्यर्थः ॥ अतः करणस्यागमापायित्वात् दृश्यत्वाच्च ॥ नित्यद्रष्टृरूपात् ॥ तत्त्वतो भिन्नस्य सुखादिजनकाः ये मात्रास्पर्शाः ते अपि अनित्या अनियतरूपाः एकदा सुखजनकस्यैव शीतोष्णादेरन्यदा दुः

आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥

खजनकत्वदर्शनात् ॥ एवं कदाचिद्दुःखजनकस्याप्यन्यदा सुखजनकत्वदर्शनात् ॥ शीतोष्णग्रहणमाध्यात्मिकाधिभौतिकाधिदैविकसुखदुःखोपलक्षणार्थं शीतमुष्णं च कदाचित्सुखं कदाचिद्दुःखं ॥ सुखदुःखे तु न कदापि विपर्ययेते इति पृथङ्निर्देशः ॥ तथा चात्मनः स्थिरत्वात्तद्भिन्नस्य विकारिणः सुखदुःखादिप्रदानभीष्मादिसंयोगवियोगरूपान् मात्रास्पर्शान् तितिक्षस्व ॥ नैते मम किंचित्करा इति विवेकेनोपेक्षस्व ॥ दुःखिनादात्म्याध्यासेनात्मानं दुःखिनं मा ज्ञासीरित्यर्थः ॥ कौन्तेय भारतेति संबोधनद्वयेनोभयकुलविशु

तेनो:

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते = १५

अन्तःकरणातिरिक्ते तद्भासकेऽभ्युपगमे स्तः = २

नन्वन्तःकरणस्य सुखदुःखाद्याश्रयत्वे तस्यैव कर्तृत्वेन भोक्तृत्वेन च चेतनत्वमभ्युपेयं तथा च तदतिरिक्ते तद्भा-
सके भोक्तरि मानाभावान्नाममात्रे विवादः स्यात् तदभ्युपगमे च वैयधिकरण्यापत्तिः अन्तः-
करणस्य सुखदुःखाद्याश्रयत्वेन जडत्वात् आत्मनश्च तदतिरिक्तस्यासङ्गत्वादित्याशंकामपनेतुमा-
ह भगवान् यं हीति यस्य स्वप्रकाशत्वेन स्वत एव प्रसिद्धं अत्रायं पुरुषः स्वयंज्योतिर्भवतीति श्रुतेः पुरुषं पू-
र्णत्वेन पुरि शयानं स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किंचनानावृतं नैनेन किंचनासंवृत-
मिति श्रुतेः समदुःखसुखं समे सुखदुःखे अनात्मधर्मतया भास्यतया च यस्य निर्विकारस्य स्वयंज्योति-
षस्तं सुखदुःखग्रहणमशेषान्तःकरणपरिणामोपलक्षणार्थं एष नित्यो महिमा ब्राह्मणस्य न वर्ध-
ते कर्मणा नो कनीयानिति श्रुत्या वृद्धिकनीयस्त्वरूपयोः सुखदुःखयोः प्रतिषेधात् धीरं धियमीरयति
प्रेरयतीति व्युत्पत्त्या चिदाभासद्वारा धीतादात्म्याध्यासेन धीरं धीप्रेरकं धीसाक्षिणमित्यर्थः स धीः स्वप्नो
भूत्वेमं लोकमतिक्रामतीति श्रुतेः एतेन वृथप्रसक्तिर्दर्शिता तदुक्तं यतो मानानि सिध्यन्ति जाग्रदादि-
त्रयं तथा भावाभावविभागश्च स ब्रह्मास्मीति बोध्यत इति एते सुखदुःखदा मात्रास्पर्शाः हि यस्मान्न
व्यथयन्ति परमार्थतो न विकुर्वन्ति सर्वविकारभासकत्वेन विकारायोग्यत्वात् सूर्यो यथा सर्वलोकस्य
चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रु-
तेः अतः स पुरुषः स्वस्वरूपभूतब्रह्मात्मैक्यज्ञानेन सर्वदुःखोपादानतदज्ञाननिवृत्त्युपलक्षिता-
य निखिलद्वैतानुपरक्तस्वप्रकाशपरमानन्दरूपाय अमृतत्वाय मोक्षाय कल्पते योग्यो भवतीत्य-
र्थः यदि ह्यात्मा स्वाभाविकबन्धाश्रयः स्यात् स्वाभाविकधर्माणां धर्मिनि ॥ ॐ नमः शिवाय ॥

चिदाभासद्वारा धीतादात्म्याध्यासेन =

भविष्यत्प्रागभावः=१ एककालं=१ विशेषगुणाश्रयाधारगुणाः यथा वह्नेः रूपप्रकाशदाहकत्वानि तेषां सर्वेषां युगपन्निवृत्तेर्धर्मिणो गुणिनो
य वह्नेर्निवृत्त्या नांतरीयकत्वं विनाभूतायथा युगपत्सर्वविशेषगुणा विनाशे वह्निनाशस्तथाकर्तृत्वादिनाशे आत्मनाशः प्रसज्येत धर्मिणः कर्त्रादिरूपेण त्वं किं
मतो मुमुक्षुत्वाच्चात्मनो युगपत्सर्वविशेषगुणनाशो स्ति परंतु तद्गुणप्रागभावरहितो नास्ति गुणानां भविष्यत्त्वस्य सुषुप्तौ सत्त्वात्तत्रात्मनि वृत्तिर्भवति मुक्तौ

गी॰ टी॰
म॰ द्वि॰
२२

22

वृत्तिमंतरेणानिवृत्तेर्नकदाचिन्मुच्येत ॥ तथा चोक्तं ॥ आत्मा कर्त्रादिरूपश्चेन्मा कांक्षीस्तर्हि मुक्त
तां ॥ नहि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेरिति ॥ प्रागभावासहवृत्तेर्युगपत्सर्वविशेषगु
णानिवृत्तेर्धर्मिनिवृत्तिनांतरीयकत्वदर्शनात् ॥ अथात्मनि बंधो न स्वाभाविकः ॥ किंतु बुद्ध्याद्यु
पाधिकृतः ॥ आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति श्रुतेः ॥ तथा च धर्मिसद्भावेपि त
न्निवृत्त्या मुक्त्युपपत्तिरिति चेत् ॥ हंत तर्हि यः स्वधर्ममन्यनिष्ठतयाभासयति स उपाधिरित्य
भ्युपगमात् बुद्ध्यादिरुपाधिः स्वधर्ममात्मनिष्ठतयाभासयतीत्यायातं ॥ तथा चायातं मार्गे ॥ बं
धस्यासत्यत्वाभ्युपगमात् ॥ नहि स्फटिकमणेर्जपाकुसुमोपधाननिमित्तो लौहित्याभासः सत्यः ॥ अ

यं हि न व्यथयंत्येते ॥ पुरुषं पुरुषर्षभ १५ ॥ ॥

तः सर्वसंसारधर्मसंसर्गिणो ह्यात्मन उपाधिवशात्तत्संसर्गित्वप्रतिभासो बंधः ॥ स्वस्वरूपज्ञानेन
तु स्वस्वरूपाज्ञानतत्कार्यबुद्ध्याद्युपाधिनिवृत्त्या तन्निमित्तनिखिलभ्रमनिवृत्तौ निर्मृष्टनिखिलभा
स्याववागतया शुद्धस्वप्रकाशपरमानंदतया पूर्णस्यात्मनः स्वत एव कैवल्यं मोक्ष इति न बंध
मोक्षयोर्वैयधिकरण्यापत्तिः ॥ अत एव नाममात्रे विवाद इत्यपास्तं भास्यभासकयोरेकत्वानु
पपत्तेः ॥ दुःखी स्वव्यतिरिक्तभास्यः भास्यत्वात् घटवदित्यनुमानात् ॥ भास्यस्य भासकत्वाद
र्शनात् एकस्यैव भास्यत्वभासकत्वे च कर्तृकर्मविरोधात् ॥ आत्मनः कथमिति चेन्न ॥ तस्य भा
सकत्वमात्राभ्युपगमात् ॥ अहं दुःखीत्यादिवृत्तिसहिताहंकारभासकत्वेन तस्य ॥ १५ ॥

तान्निवृत्तिरेव न स्यात् प्रागभावस्य विशेषगुणानामसत्वात्=१

धर्मं

प्रागुक्तं

निवृत्त

आत्मनः

२२

आत्मनः

भास्यभासकत्वम=२

दुःखाद्यास्पदस्य भानकरणस्वरूपस्य भासकस्यात्मनो भानं प्रतिकरणान्तरानपेक्षत्वेपि = नैयायिकनये भासकस्य भानस्वरूपस्वी कारेण स्वातिरिक्तभानसापेक्षत्वम् = ३ दुःखिन आत्मन एव स्वप्रकाशबुद्धिरूपभानेन दुःखाभासकत्वात् स्वातिरिक्तभासकानपेक्षत्वम् = ५

निरोधान

कदापि भास्यकोटावप्रवेशात् ॥ अत एव दुःखीनस्यातिरिक्तभासकापेक्षा भासकत्वात् दीपवदित्यनु
मानमपि न भास्यत्वेन स्वातिरिक्तभासकसाधकेन प्रतिरोधात् ॥ भासकत्वं च भानकरणत्वं स्वप्रका
शभानरूपत्वं वा ॥ आद्ये दीपस्येव करणान्तरानपेक्षत्वेपि स्वातिरिक्तभानसापेक्षत्वं दुःखिनो न व्याह
न्यते ॥ अन्यथा दृष्टान्तस्य साध्यवैकल्यापत्तेः ॥ द्वितीये तु सिद्धो हेतुरित्यधिकबलतया भास्यत्वहे
तुरेव विजयते ॥ बुद्धिस्वातिरिक्तभानानभ्युपगमात् बुद्धिरेव भानरूपेति चेत् ॥ न ॥ भास्यस्य सर्वदे
शकालानुस्यूततया भेदकधर्मशून्यतया च विभोर्नित्यस्यैकस्य चानित्यपरिच्छिन्नानेकरूपबुद्धिपरि
णामात्मकत्वानुपपत्तेः उत्पत्तिविनाशादिप्रतीतेश्चावश्यकल्प्यविषयसंबंधविषयतयाप्युपपत्तेः ।
अन्यथा तत्तज्ज्ञानोत्पत्तिविनाशभेदादिकल्पनायामतिगौरवापत्तेरित्याद्यन्यत्र विस्तरः ॥ तस्माच

बुद्धिज्ञान

समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

श्रुतिः ॥ नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते विनाशित्वात् ॥ आकाशवत्सर्वगतश्च नित्यः महद्भूतम
नन्तमपारं विज्ञानघन एव ॥ तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्याद्या
विभुनित्यस्वप्रकाशज्ञानरूपतामात्मनो दर्शयति ॥ एतेनाविद्यालक्षणाद्दुःखादेर्व्यतिरेकः सिद्धः
अतो मत्याद्याधिनिर्बन्धनबन्धभ्रमस्य सत्यात्मज्ञानान्निवृत्तौ मुक्तिरिति सर्वमनवद्यं ॥ पुरुषर्षभेति संबो
धनं स्वप्रकाशचैतन्यरूपत्वेन पुरुषत्वं परमानन्दरूपत्वेन च आत्मन ऋषभत्वं सर्वद्वैतानपेक्षतया श्रेष्ठ
त्वमजानन्नेव शोचसि अतः स्वस्वरूपज्ञानादेव तव शोकनिवृत्तिः सुकरा तरति शोकमात्मविदिति श्रु
तेरिति सूचयति ॥ अत्र पुरुषमित्येकवचनेन सांख्यपक्षो निराकृतः ॥ तैः पुरुषबहुत्वाभ्युपगमात् १५

भास्यपदेन प्र वेशाभाव = भानकरणत्वं = ३

दीपस्य

भानेन किं तु विष यसंबन्धस्वरूपउत्पत्तिविनाशादि प्रतीतिः = २

हेतुः किं

स्वातिरिक्तभान सापेक्षत्वम् स्वैक साध्यं स्वातिरिक्तभानसापेक्षत्व म् = ८

प

अविनाशिज्ञान रूपत्वात्

आत्मनः पुरुष र्षभत्वम् = २

अनवद्य

नासतो विद्यते भावो नाभावो विद्यते सतः उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ यद्यप्यात्मप्रतीतत्ता परमार्थसत्ताऽलमेव तथाऽप्यनात्मापि
प्रतीतत्ता परमार्थसत्ताऽलमेव इति योगः ॥ यद्यप्यात्मनि परमार्थसत्ता निश्चला तदा नात्मन्यपि निश्चला स्यात् इति नेमः ॥ एवमनात्मनि यथा मि

ननु भवतु पुरुषैकत्वं ॥ तथापि तस्य तज्जडदृश्यत्वरूपः सत्य एव संसारः तथा च शीतोष्णादि
सुखदुःखकारणेष्वतितरां तस्यावश्यकत्वात् तस्य च ज्ञानाद्विनाशानुपपत्तेः कथं तितिक्षा
थं वा मोक्षतत्त्वाय कल्पते इति चेन्न ॥ कृत्स्नस्यापि द्वैतप्रपंचस्यात्मनि विकल्पितत्वेन तत्त्वज्ञा
नाद्विनाशोपपत्तेः शुक्तौ कल्पितस्य रजतस्य शुक्तिज्ञानेन विनाशवत् ॥ कथं पुनरात्माना
त्मनोः प्रतीत्यविशेषे आत्मवदनात्मापि सत्यो न भवेत् ॥ अनात्मवदात्मापि वा मिथ्या न भवे
त् उभयोरप्यन्यतरकल्पनायोगाद्धेमत्वादित्याशंक्य विशेषमाह भगवान् ॥ नासत इति यत्कालतो देश
तो वस्तुतो वा परिच्छिन्नं तदसत् यथा घटादि जन्मविनाशशीलो घटः कालेन परकालेन च परिच्छि
द्यते ध्वंसप्रागभावप्रतियोगित्वात् ॥ कादाचित्कं कालपरिच्छिन्नमित्युच्यते ॥ एवं देशपरि
च्छिन्नमपि तदेव मूर्तत्वेन सर्वदेशावृत्तित्वात् ॥ कालपरिच्छिन्नस्य देशपरिच्छेदनियमेऽपि दे
शापरिच्छिन्नत्वेनाभ्युपगतस्य परमाण्वादेस्तार्किकैः कालपरिच्छेदानभ्युपगमात् देशपरिच्छे
दोऽपि पृथगुक्तः ॥ स च किंचिद्देशावृत्तित्वरूपोऽत्यन्ताभावः ॥ एवं सजातीयभेदो विजातीयभेदः स्वगतभे
दश्चेति त्रिविधो भेदो वस्तुपरिच्छेदः ॥ यथा वृक्षस्य वृक्षान्तरात् शिलादेः पत्रपुष्पादेश्च भेदः
अथवा जीवेश्वरभेदो जीवजगद्भेदो जीवपरस्परभेदः ईश्वरजगद्भेदो जगत्परस्परभेदश्चेति पंचविधो
वस्तुपरिच्छेदः ॥ कालदेशापरिच्छिन्नस्याप्याकाशादेस्तार्किकैर्वस्तुपरिच्छेदाभ्युपगमात् पृथङ्नि
र्देशः एवं सांख्यमतेऽपि योजनीयं ॥ एतादृशस्यासतः शीतोष्णादेः कृत्स्नस्यापि प्रपंचस्य भावः सत्ता
पारमार्थिकत्वं वा न्यूनसत्ताकता देशापरिच्छेदशून्यत्वं न विद्यते न संभवति घटत्वाघटत्वयोरिव प

कल्पी

स्परविरोधेन प्रपंचस्ततो न्यूनसत्ताव्यावहारिकी यस्य देशकालवस्तुपरिच्छेदस्य तद्वत्ता त्रिकूटात्मकं प्रपंचनपरिच्छेदयोर्व्यावहारिक
सत्ता परमार्थ आत्मनः कास्यनिक परिच्छेद ... देशालितं इति ज्ञापयितुं सान्यूनसत्ताके ति = २

निरूपकता न=
कादाचित्कमेव=
मूर्तत्वे परिच्छि
न्नपरिमाण
वत्त्वम्=
देशपरिच्छेद
एतादृशाभाव
रूपश्च=
देशकालवस्तु
परिच्छेदत्रय=

स्यात्म
व्यावहारिकसत्ता परमार्थसत्तायाः न्यूनत्वं = ३

अपितुनिषिध्यतस्व=१ नुकुनिष्ठयोगत्वप्रतियोगितेन=५ सतिसतोभेदाद घटादौचन=६

अननुगताभावात्

न्कालेदेशेवस्तुनिवानतिषिध्यतेऽननुगमात् ॥ नवासद्वस्तुक्वचिद्देशेकालेवस्तुनिवानिषिध्यतेस
र्वत्राननुगमात् ॥ तथाचसर्वत्राननुगतेसद्वस्तुनिअननुगतंव्यभिचारिवस्तुकल्पितंरज्जुसर्पइत्यननुग
तेव्यभिचारिसर्पधारादिकमितिभावः ॥ ननुव्यभिचारित्वेनकल्पितत्वेसद्वस्तुन्यपिकल्पितंस्यात्तस्या
पिपरिच्छिन्नत्वेनव्यभिचारित्वादित्यतआह ॥ नाभावोविद्यतेसतइति ॥ सदधिकरणकभेदप्रति
योगित्वंहिवस्तुपरिच्छिन्नत्वंतच्चननुक्तव्यावृत्तत्वेनतत्केशशविषाणादौसत्त्वायोगात् ॥ सद्भाम
भावोनिरूप्यइतिन्यायात् ॥ एकस्यैवस्वप्रकाशस्यनित्यस्यविभोःसतः ॥ सर्वानुस्यूतत्वेनसद्व्यक्तिभेदा
नभ्युपगमात् ॥ घटःसन्नित्यादिप्रतीतेःसार्वलौकिकत्वेनसतोघटाद्यधिकरणकभेदप्रतियोगि
त्वायोगात् ॥ अभावःपरिच्छिन्नत्वंदेशतःकालतोवस्तुतोवासतःसर्वानुस्यूतस्यतस्मात्तस्यनविद्यतेनसं
भवतिसर्वंखल्विदंब्रह्मेत्यादित्यर्थः ॥ ननुसन्नामकिमपिवस्तुनास्त्येवयस्यदेशकालवस्तुपरिच्छेदःप्र
तिषिध्यते ॥ किंतर्हिसत्त्वंनामपरंसामान्यंतदाश्रयत्वेनद्रव्यगुणकर्मसुसद्व्यवहारः ॥ तदेकाश्रय
संबंधेनसामान्यविशेषसमवायेषुतथाचासतःप्रागभावप्रतियोगिनोघटादेःसत्त्वंकारणव्यापा
रात् ॥ सतोपितस्याभावःकारणनाशाद्भवत्येवेतिकथमुक्तंनासतोविद्यतेभावोनाभावोविद्यतेसत
इति ॥ एवंप्राप्तेपरिहरति ॥ उभयोरपीत्यर्धेन ॥ उभयोरपिसदसतोःसतश्चासतश्चोक्तोमर्यादानि
यतरूपत्वंयत्सत्तत्सदेवयदसत्तदसदेवेतिदृष्टोनिश्चितःश्रुतिस्मृतियुक्तिभिर्विचारपूर्वकं के।
तत्त्वदर्शिभिःवस्तुयाथात्म्यदर्शनशीलैर्ब्रह्मविद्भिर्नतुकुतार्किकैः ॥ अतःकुतार्किकाणां १४ ॥

दस

भिन्नत्वेन तुके भाव=७

अन्योन्याभावः घटःसन्नित्यादि प्रतीतेरभावात्= घटेसतोभेदा नास्ति=परिच्छि न्नतापरिच्छिन्न त्वयोः=

सद्वस्तुनः

प्रतियोगित्वप्रतियोगि भाव=

जातिर्द्विविधा परापरा च परा सत्ता अपरा द्रव्यत्वादिः=६ असमवायिकारण संयोगनाशात्=८

नविपर्ययानुपपत्तिः तच्छब्दोव्यवहारयोः ॥ एकान्तरूपो नियम एव दृष्टो न तत्त्वेनैकान्तरूपो ऽन्यथाभाव इति तत्त्व
दर्शिभिरेव दृष्टो नातत्त्वदर्शिभिरिति वा ॥ तथा च श्रुतिः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यु
पक्रम्यैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्युपसंहरन्ती सदेकं सजातीयविजाती
यस्वगतभेदशून्यं सत्यं दर्शयति ॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादि श्रुतिस्तु वि
कारमात्रस्य व्यभिचारिणो वाचारंभणत्वेनानृतत्वं दर्शयति ॥ अन्नेन सोम्य शुंगेनापो मूलमन्वि
च्छाद्भिः सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः
प्रजाः सदायतनाः सत्प्रतिष्ठा इति श्रुतिः सर्वेषामपि विकाराणां सति कल्पितत्वं दर्शयति ॥ सत्त्वं च न
सामान्यं तत्र मानाभावात् ॥ पदार्थमात्रसाधारणात् सत्त्वं सदिति प्रतीत्या द्रव्यगुणकर्ममात्रवृत्ति

नासतो विद्यते भावो नाभावो विद्यते सतः ॥ ८ ॥

सत्त्वस्य स्वानुपपादकस्याकल्पनात् वैपरीत्यस्यापि स्ववचत्वात् ॥ एकरूपप्रतीतेरेकरूपविषयनि
यीह्यत्वेन सर्वव्यभेदस्य स्वरूपसत्त्वस्य च कल्पयितुमनुचितत्वात् ॥ विषयस्यानन्त्ये ऽपि प्रतीत्यनु
गमे जातिमात्रोच्छेदप्रसंगात् ॥ तस्मादेकमेव सद् स्वतः स्फुरणरूपं ज्ञाताज्ञातावस्थाभासक
त्वतादात्म्याध्यासेन सर्वव्यवहारोपपादकं ॥ सन् घट इति प्रतीत्या तावत्सद्व्यक्तिमात्राभिन्नत्वेन घ
टे विषयीकृतेन तत्सत्तासमवायित्व ॥ अभेदप्रतीतेर्भेदघटितसंबन्धानिर्वाह्यत्वात् ॥ एवं द्रव्यं स
द्गुणाः सन्नित्यादिप्रतीत्या सर्वाभिन्नत्वं सतः सिद्धं ॥ द्रव्यगुणादिभेदाभिज्ञाचनते(?)षु सत्त्वं नाम धर्मः

द्रव्यं सद्गुणाः सन्नित्यादिप्रतीत्या द्रव्यगुणादीनां सतः सकाशाद्भेदासिद्धा द्रव्यगुणादेः
परस्परं भेदासिद्धाः = १

अयंभावः भेदग्राहिप्रमाणस्याभेदग्राहिप्रमाणस्य च व्यावहारिकपारमार्थिकरूपभिन्नविषयत्वान्न विरोधः यदि तु स्यात् दुर्जनतुष्टिन्यायेन समानविषयत्वं तथापि यत्र भेदो न गृहीतुं शक्यते तत्रैवाभेदप्रतीतिर्विजयते यथाज्ञानेन घटस्य पटाद्भेदग्रहेऽपि न तेन तस्य भेदो गृहीतुं शक्यः तस्य स्वातिविषयकत्वात् ज्ञानान्तरेणाभेदग्रहणे तु कारेऽपि न तस्याप्येवं तस्याप्यज्ञानेनैवं वस्तु ज्ञानधारा विश्रान्तिस्तत्रैव भेदज्ञानाभावादभेदग्राहिप्रमाणस्याभेदग्राहिप्रमाणस्यैकान्तसंपत्तौ भेदग्राहिप्रमाणानां बाधकत्वा

ते॥ किं तु सति धर्मिणि द्रव्याद्यभिन्नत्वेनाभावात्॥ तच्च वास्तवं न संभवतीत्यायासिकमित्यन्यत॥ तदु

क्तं वार्तिककारैः॥ सत्तातोऽपि न भेदः स्याद्द्रव्यत्वादेः कुतोऽन्यतः॥ एकाकारा हि संवित्तिः सद्द्रव्यं सद्गुण

स्तथेत्यादि॥ सत्तापि नासतो भेदिकातस्याप्रसिद्धेः॥ द्रव्यत्वादिकेन तु सद्रूपत्वात् सतो भेदकमित्यर्थः॥ अ

त एव घटो भिन्नः पट इत्यादिप्रतीतिरपि न भेदसाधिका घटपटतद्भेदानां सद्भेदेनैक्यात् एवं यत्रैव न

भेदग्रहः तत्रैव लब्धपदा सतीसदभेदप्रतीतिर्विजयते॥ तार्किकैः कालपदार्थस्य सर्वात्मकस्याभ्युपग

मात्तेनैव सर्वव्यवहारोपपत्तौ न तदतिरिक्तपदार्थकल्पने मानाभावात्॥ तस्यैव सर्वानुस्यूतस्य सद्रूपे

णास्फुरणाच्च सर्वतादात्म्येन प्रतीत्युपपत्तेः स्फुरणस्यापि सर्वानुस्यूतत्वेनैकत्वान्नित्यत्वं विस्तरेणाग्रि

उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥१६॥

मश्लोके वक्ष्यते॥ तथा च॥ यथा कस्मिंश्चिद्देशे काले वा घटस्य पटादेर्देशान्तरे कालान्तरे वा घटत्वं

एवं कस्मिंश्चिद्देशे काले वा घटस्यात्यन्ताघटत्वं शक्रेणापि न शक्यते संपादयितुं पदार्थस्वभावभंगा

योगात्॥ एवं कस्मिंश्चिद्देशे काले वा सतो देशान्तरे कालान्तरे वासत्त्वं॥ कस्मिंश्चिद्देशे काले वास

तोऽत्यन्तासत्त्वं न शक्यते संपादयितुं युक्तिसाम्यात्॥ अत उभयोर्नियतरूपत्वमेव द्रष्टव्यमित्यद्वैत

सिद्धौ विस्तरः॥ अतः सदेव वस्तु मायाकल्पितासद्विरुद्धत्वात् अन्तत्वाय कल्पते सन्मात्ररू

पा च तितिक्षापि युज्यत इति भावः॥१६॥ ॥ ॥ राम॥ ॥ ॥ श्रीरामजीसहा॥ ॥ ॥

विशेषणवाचैः =

सातिकल्पितता न = ३

तूपेण

इन्द्रेणापि

समतादभेदप्रतीतिर्विजयते = ५

धातुः ज्ञानबोधने   वामर्थं व=१

गी॰ टी॰ म॰ द्वि॰ २५

25

नन्वेतादृशस्य सतो ज्ञानादेर्देशपरिच्छिन्नत्वापत्तेर्ज्ञानात्मकत्वमभ्युपेयं ॥ तच्चानात्माध्यासिकं ॥ अन्यथा जडत्वापत्तेः ॥ तथा चानात्माध्यासिकज्ञानरूपस्य सतो घटवदर्थत्वादुत्पत्तिविनाशवत्वं ॥ घटज्ञानमुत्पन्नं घटज्ञानं नष्टमिति प्रतीतेश्च ॥ एवं चाहं घटं जानामीति प्रतीतेः तस्य साश्रयत्वं सविषयत्वं चेति देशकालवस्तुपरिच्छिन्नत्वात् स्फुरणात्मकं यत्तद्रूपस्य सतो देशकालवस्तुपरिच्छेदशून्यत्वमित्याशंक्याह ॥ अविनाशीति विनाशो देशतः कालतो वस्तुतो वा परिच्छेदः सोऽस्यास्तीति विनाशि परिच्छिन्नं तद्भिन्नमविनाशि सर्वप्रकारपरिच्छेदशून्यं तु एव तत्सद्रूपं स्फुरणं तु विद्धि जानीहि ॥ किं तत् येन सद्रूपेण स्फुरणेनानेकं नित्यं विभुना सर्वमिदं दृश्यजातं स्वतः सत्तास्फूर्तिशून्यमततं व्याप्तं स्वसत्तास्फूर्तिव्याप्त्या न रज्जुशकलेनेव सर्पधारादि स्वस्मिन्समावेशितं तत् अविनाशमेव विद्धीत्यर्थः ॥ कस्मात् यस्मात् विनाशं परिच्छेदं अव्ययस्यापरिच्छिन्नस्यास्य परोक्षस्य सर्वानुस्यूतस्य स्फुरणरूपस्य सतः ॥ कश्चित्कोऽप्याश्रयो वा विषयो वा इन्द्रियसन्निकर्षादिरूपो हेतुर्वा न कर्तुमर्हति समर्थो न भवति ॥ कल्पितस्याकल्पितपरिच्छेदकत्वायोगात् आरोपमात्रेण चेत्यापतेः ॥ अहं घटं जानामीत्यत्र हि अहंकारस्याश्रयतया भासते घटस्तु विषयतया उत्पत्तिविनाशवती काचिदहंकारवृत्तिस्तु सर्वतो विप्रसृतस्य सतः स्फुरणस्य व्यंजकतया ॥ आत्ममनोयोगस्यापि वैरपि ज्ञानहेतुत्वाभ्युपगमात् ॥ नतूत्पत्तिविनाशौ नैव च तद्रूपस्य हि तेः स्फुरणरूपे सत्युत्पत्तिविनाशप्रतीत्युपपत्तेर्नैकस्य स्फुरणस्योत्पत्तिविनाशकल्पनाप्रसंगः ध्वन्यवच्छेदेन शब्दवत् घटाद्यवच्छेदेनाकाशवच्च ॥ अहंकारस्तु तस्मिन्नध्यस्तोऽपि तदाश्रयतया ॥ १७ ॥

स्वरेउन=

नैयायिकैः

ज्ञानस्य=३ स्फुरणरूपस्य

भासव इत्य नेनान्वयः

२५

स्फुरणे अहंकारवृत्ति=२

ध्वन्युत्पत्तिविनाशेन ध्वन्यवच्छिन्न शब्दे व्याकरणात् यथा उत्पत्तिविनाशप्रतीतिर्यथा=२

चैतन्यतादात्म्याध्यासव स्यात् अहंकारवृत्तेरास्ये यो हि कारस्त्रै तन्या श्रयतया स्फुर्तिः = १ नतु विमतौ ज्ञानसामान्योदयात्मा यावन्तरालकालवृत्तौ उदय ... यत्वात् संप्रति पन्नवत्
सुषुप्तिकालीन आत्मा ज्ञानसामान्याभाववान् तद्वत्तेनास्मर्यमाणत्वात् योयद् ... अन्तरालकालत्वम्वान् कालत्वात् संप्रतिपन्नकालवदित्यनुमानेन प्रज्ञानसिद्धावनुमा
दत्वेनास्मर्यमाणः स तदभाववान् संप्रतिपन्नवदित्याशंकायाम् नचेति = २ नप्रवृत्तिरितिचेत्तत्राह लिंगेति = ३ नियमेनास्मर्यमाणत्वादित्येतौ नव्यभिचार इतिचे

संस्कारवृत्तिः = सुषुप्तस्यापि प्रबोधे कदाचित्स्मरणाभावान्नास्मरणस्य ज्ञानाभावसाधकत्वम् = ५

भासते तं हृत्ति तादात्म्याध्यासात् सुषुप्तावहंकाराभावेपि तद्वासनावासिताज्ञानभासकस्य चैतन्यस्य स्वतः स्फुरणात् ॥ अन्यथा ॥ एतावन्तं कालमहं किमपि नाज्ञासिषमिति सुप्तोत्थितस्य स्मरणं न स्यात् ॥ नचोत्थितस्य ज्ञानाभावानुमितिरियमिति वाच्यं ॥ सुषुप्तिकालत्वपक्षत्वाज्ञानालिंगासंभवाच्च ॥ अस्मरणादेर्व्यभिचारित्वात् ॥ स्मरणाजनकतिर्विकल्पकायैभावासाधकत्वाच्च ॥ ज्ञानसामग्र्यभावस्य चात्योन्याश्रयग्रस्तत्वात् ॥ तथा च श्रुतिः ॥ यद्वै तन्न पश्यति पश्यन्वै तन्न द्रष्टव्यं न पश्यति ॥ नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ऽविनाशित्वादित्यादिः ॥ सुषुप्तौ स्वप्रकाशस्फुरणसद्भावं तन्नित्यतया दर्शयति ॥ एवं घटादिविषयोपि तदज्ञानावस्थाभासके स्फुरणोकल्पि

स्फुरणा

अविनाशित्वतद्धिहि ॥ येन सर्वमिदं ततं ॥ ॥ ५ ॥

तः ॥ य एव प्रागज्ञातः स एव इदानीं मया ज्ञात इति प्रत्यभिज्ञानात् ॥ अज्ञातज्ञापकत्वं हि प्रमाणं पसर्वतंत्रसिद्धांतः ॥ यथार्थानुभवः प्रमेति वदद्भिस्तार्किकैरपि ज्ञातज्ञापिकायाः स्मृतेर्व्यावर्तकमननुभवपदं प्रयुंजानैस्तदभ्युपगमात् ॥ अज्ञातत्वं च घटादेर्न चक्षुरादिना परिच्छिद्यते तत्तत्सामर्थ्यात् तज्ज्ञानोत्तरकालमज्ञानस्यानुवृत्तिप्रसंगाच्च ॥ नाप्यनुमानेन लिंगाभावात् न हीदानीं ज्ञातत्वेन प्रागज्ञातत्वमनुमातुं शक्यं धारावाहिकानेकज्ञातविषये व्यभिचारात् इदानीमेव ज्ञातत्वं प्रागज्ञातत्वे सतीदानीं ज्ञातत्वरूपं साध्यविशिष्टत्वादसिद्धं न चाज्ञातावस्थाज्ञानमंतरेणाज्ञानं प्रति घटादेर्हेतुताग्रहीतं ॥ ॥ ॥ ॥ श्रीरामजीसहा ॥ ॥ ॥ ॥ ॥ ५ ॥

मेदकम्

घटे =

ज्ञानपदं विमाय = १ अज्ञातज्ञापकत्वाभ्युपगमात् = २ अज्ञानस्वरूपा दित्वात् = ४ अन्यथा यथार्थज्ञानं प्रमेति वदद्भिः = ३ अज्ञातस्य = ५

अज्ञानांशे ज्ञानत्वस्याग्रहात् हेतोः = २ स्फुरणे स्फुरणस्य ब्रह्मपंचाधिष्ठानत्वेन = ७
अज्ञानानां वस्याज्ञानमेव पूर्ववत्स्फुरितस्याग्रहात् = ८

शाकाते शुद्धवर्तित्वाग्रहात् घटं न जानामीति सार्वलौकिकानुभवविरोधश्च तस्मादज्ञातं स्फुरणां
भासमानं साध्यस्य घटादिकं भासयतीति घटादीनामज्ञाते कल्पितत्वसिद्धिः ॥ अन्यथा घटादे
र्जडत्वेनाज्ञातत्वतज्ज्ञानयोरनुपपत्तेः स्फुरणं चाज्ञातं साध्यस्य नैवाज्ञानेनेति स्वयमेव भगवा
न्वदतीति अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इत्यत्र एतेन विभुत्वसिद्धिः ॥ तथा च श्रुतिः ॥ म
हद्भूतमनन्तमपारं विज्ञानघन एवेति ॥ सत्यं ज्ञानमनन्तमिति च ज्ञानस्य महत्त्वमनन्तत्वं च द
र्शयति ॥ महत्त्वं साध्यस्य सर्वसंबंधित्वमनन्तत्वं त्रिविधपरिच्छेदशून्यत्वमिति विवेकः ॥ प

विनाशमव्ययस्यास्य ॥ न कश्चित्कर्तुमर्हति ॥ १७ ॥

निरस्तः

तेन शून्यवादोऽपि अपास्तः निरधिष्ठानभ्रमायोगान्निरवधिबाधायोगाच्च ॥ तथा च श्रुतिः ॥ पु
रुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति सर्वबाधावधिं पुरुषं परिशिनष्टि ॥ उक्तं च भा
ष्यकारैः ॥ सर्वं विनश्यद्वस्तुजातं पुरुषान्तं विनश्यति ॥ पुरुषो विनाशहेत्वभावान्न विनश्यती
ति एतेन क्षणिकवादोऽपि परास्तः ॥ अबाधितप्रत्यभिज्ञानादन्यदृष्टस्यान्यस्मरणायोगानुपप
त्तेश्च ॥ तस्मादेकस्य सर्वानुस्यूतस्य स्वप्रकाशस्फुरणरूपस्यातः सर्वप्रकारपरिच्छेदशून्यत्वा

तत्त्वस्फुरणात्मरूपस्य सतः कथमविनाशित्वं तस्य देहधर्मत्वात् ॥ देहस्य चानुद्गमविनाशादिति भूतचैतन्
न्यवादिनः तान्निराकुर्वन्नाह नैनो विद्यते भावश्चेत्तद्धि हरणोऽति ॥ अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥ अन्तवन्तो विनाशिनः इमे परोक्षा देहाः उपचितापचित
रूपत्वाच्छरीराणि वक्ष्यमाणवचनात् स्थूलसूक्ष्मकारणरूपाः विराट्सूत्राव्याकृताख्याः समष्टिव्यष्ट्या
त्मानः सर्वे नित्यस्य अविनाशिन एव शरीरिणः आध्यात्मिकसंबंधेन शरीरवतः एकस्यात्मनः स्वप्र
काशस्फुरणात्मरूपस्य सैंधवघनोऽरूपत्वेन भोग्यत्वेन चोक्ताः श्रुतिभिर्ब्रह्मवादिभिश्च ॥ तथा च तैत्ति
रीयके ॥ अन्नमयाद्यानंदमयांतान्पंचकोशान्कल्पयित्वा तदधिष्ठानमकल्पितं ब्रह्म पुच्छं प्रतिष्ठे
ति दर्शितं ॥ तत्र पंचीकृतपंचमहाभूततत्कार्यात्मको विराट्मूर्तिराशिरन्नमयकोशः स्थूलसमष्टिः
तत्कारणीभूतापंचीकृतपंचमहाभूततत्कार्यात्मको हिरण्यगर्भः सूत्रमूर्तिराशिः सूक्ष्मसमष्टिः
त्रयं वा इदं नामरूपं कर्मेति बृहदारण्यकोक्त आत्मकः स सर्वकर्मात्मकत्वेन क्रियाशक्तिमात्रमादाय
प्राणमयकोश उक्तः ॥ नामात्मकत्वेन ज्ञानशक्तिमात्रमादाय मनोमयकोश उक्तः ॥ रूपात्मकत्वेन
तदुभयाश्रयतया कर्तृत्वमादाय विज्ञानमयकोश उक्तः ततः प्राणमयमनोमयविज्ञानमया
त्मक एव हिरण्यगर्भाख्यो लिंगशरीरकोशः तत्कारणीभूतस्तमोमायोपहितचैतन्यात्मा सर्वसं
स्कारशेषो व्याकृताख्य आनंदमयकोशः ॥ ते च सर्वे एकस्यैवात्मनः शरीराणीत्युक्तं ॥ तस्यैष
एव शारीर आत्मा यः पूर्वस्येति ॥ तस्य प्राणमयस्यैष एव [illegible]वः शारीर आत्मा यः सत्यज्ञाना
दिलक्षणो गुहानिहितत्वेनोक्तः सर्वस्यान्नमयस्य ॥ एवं प्राणमयमनोमयविज्ञानमयानंद ।

यावद्विकारं प्रतिकार्यं विभागः परिच्छेदोऽस्ति लोकवत्
यथा लोके घटवृक्षादीनां परस्परं विभागदर्शनात् कल्पितत्वम्

मयेषु योज्यं । अथवा इमे सर्वे देहाः त्रैलोक्यवर्तिसर्वप्राणिसंबंधिन एकस्यैवात्मन उक्ता इति योजना । तथा च श्रुतिः ॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति सर्वशरीरसंबंधिनमेकमात्मानं नित्यं विभुं दर्शयति ॥ ननु नित्यत्वं यावत्कालस्थायित्वं तथा चाविद्यादिवत् कालेन सह नाशेपि तदुपपन्नमित्यत आह ॥ अनाशिन इति ॥ देशतः कालतो वस्तुतश्च परिच्छिन्नस्याविद्यादेः कल्पितत्वेनानित्यत्वेपि यावत्कालस्थायित्वरूपमौपचारिकं नित्यत्वं व्यवह्रियते ॥ यावद्विकारं तु विभागो लोकवदिति न्यायात् । आत्मनस्तु परिच्छेदत्रयशून्यस्याकल्पितस्य विनाशहेत्वभावान्मुख्यमेव कूटस्थनित्यत्वं न तु परिणामिनित्यत्वं यावत्कालस्थायित्वं वेत्यभिप्रायः ॥ ननु वेदान्तैर्देहिनि किंचिन्मानमवश्यं वाच्यं ॥ अन्यथाऽनिष्प्रमाणस्य तस्यालीकत्वापत्तेः शास्त्रारंभवैयर्थ्यापत्तेश्च ॥ तथा च वस्तुपरिच्छेदोऽप्य दुर्वारः [?] शास्त्रयोनित्वादिति न्यायाच्च ॥ अत आह ॥ अप्रमेयस्येति ॥ एकरूपेणैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवमजममरमप्रमेयं ॥ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ॥ तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति च श्रुतेः ॥ स्वप्रकाशचैतन्यरूप एवात्मा तत्तस्य सर्वभासकस्य स्वभानार्थं न स्वभासापेक्षा किंतु कल्पिताज्ञानतत्कार्यनिवृत्त्यर्थं कल्पितवृत्तिविशेषापेक्षा ॥ कल्पितस्यैव कल्पितविरोधित्वात् ॥ यक्षानुरूपो बलिरिति न्यायात् । तथा च सर्वकल्पितनिवर्तकवृत्तिविशेषोत्पत्त्यर्थं शास्त्रारंभः ॥ तत्त्वमसीत्यादिवाक्यमात्राधीनत्वात् ॥ स्वतः सर्वदा भासमानत्वात् सर्वकल्पनाधिष्ठानत्वात् स्वरूपमात्रभासकत्वा ॥ ।

तथाविद्यादीनामपि तथा च कल्पितत्वेनानित्यत्वे स्वस्य मेवं [?]

तु कृत्वापत्तेः शास्त्रयोनिः प्रमाणं यस्मिन्निति =

प्रमाणान्तरनिरच = [?]

वृत्तिविशेष ज्ञा = २

चैतन्यस्य   अनवधारणं ज्ञानं संशयः = अतद्रूपेतित्प्रकारकोभ्रमो विपर्ययः = ८   शास्त्रमेयैकवृत्ति

वेद

स्वतत्त्वस्यतच्छत्वापत्तिः ॥ तथाच ॥ एकमेवाद्वितीयंसत्यंज्ञानमनंतंब्रह्मेत्यादिशास्त्रमेवत्वमेयानुरो
येनस्वस्यापिकल्पिततमापादयति ॥ अन्यथास्त्वप्रामाण्यानुपपत्तेः कल्पितस्यवाकल्पितपरि।
च्छेदकत्वंनास्तीतिप्राक्प्रतिपादितं ॥ आत्मनःस्वप्रकाशत्वंचयुक्तितोपिभगवत्पूज्यपादैरुपपा
दितं ॥ तथाहि ॥ यत्रजिज्ञासोःसंशयविपर्ययव्यतिरेकप्रमाणमन्यतममपिनास्ति ॥ तत्रतद्वि
रोधिज्ञानमितिसर्वत्रदृष्टं ॥ अन्यथावितथात्यतत्वापत्तेः ॥ आत्मनिचाहंवानाहंवेतिनकस्यचित्सं
शयः ॥ नापिनाहमितिविपर्ययः ॥ व्यतिरेकप्रमावेतितत्स्वरूपप्रमासर्वदास्तीतिवाच्यं ॥ तस्यस
र्वसंशयविपर्ययधर्मित्वात् ॥ धर्मिणोसर्वमभ्रांतप्रकारेतुविपर्ययइतिन्यायात् । अतएवोक्तं ॥ प्र
माणमप्रमाणंचप्रमाभासस्तथैवच ॥ कुर्वंत्येवप्रमांयत्रतदसंभावनाकृतइति ॥ प्रमाभासःसंश
यःस्वप्रकाशेसद्रूपेधर्मिणिप्रमाणाप्रमाणयोर्विशेषोनास्तीत्यर्थः ॥ आत्मनोभासमानत्वेचघ
टज्ञानेमयिज्ञातेनवेत्यादिसंशयःस्यात् ॥ नचात्रपदार्थविशेषसेवसंशयादिप्रतिबंधकत्व
स्वभावःकल्प्यः ॥ वोह्यपदार्थेलघुनैनविरोधिज्ञानेनैवसंशयादिप्रतिबंधसंभवेआंतरपदार्थस्व
भावभेदकल्पनायाअनौचित्यात् ॥ अन्यथासर्वविलवापत्तेः ॥ आत्ममनोयोगमात्रंत्वात्म
साक्षात्कारेहेतुः ॥ तस्यचज्ञानमात्रेहेतुत्वात् ॥ घटादिभानेप्यात्मभानेसमूहालंवनत्वायेन
तार्किकाणांप्रवेशणापिदुर्निवारं ॥ नचवाह्यत्वमानसत्वादिसंकरः ॥ लौकिकत्वालौकि
कत्ववदंशभेदेनोपपत्तेः संकरस्यादोषत्वाच्चात्वषत्वादेर्जातित्वानभ्युपगमाच्चातएववाय
वं सायमात्रपवात्मभानसामग्रीविद्य । ॥

प्राभाकरमत माहृग्यतरवेति

आत्ममनोयोगादि = १   दिराहित्येनभानंदुर्निवारम् = ३

Margin (right): अनुसारेण

Margin (right): संशयादिवि रोधिस्वरूप ज्ञानं = घटचक्षुःसन्निकर्षजन्यप्रत्यक्षादिज्ञानेन = ५ प्रमाभासे देसति = ८

Margin (right): ज्ञानादौ = घटादौ

Margin (left): धर्मोशेतदुद्भिन्नपरोक्षतया वंभाप्रमानेधिष्ठानेशेसर्वप्राप्तिशेज्ञानंमअन्तविप्रतिपत्तिरहितंप्रतिपत्तिरजतत्वादिप्रकारेतुविपर्ययोविपरीतज्ञानंसर्वस्यार्थः = ५

Margin (bottom): दण्डीपुरुषइतिविशिष्टज्ञानेदण्डोविशेषणं तथाभासतेपुरुषोविशेष्यतया तत्संयोगःसंसर्गतया दण्डपुरुषसंयोगइतिसमूहालम्बनेतुविशेषणत्वादिराहित्येन दण्डादयोभान्ति तथाचविशेषणत्वादिराहित्येनानेकपदार्थावगाहिज्ञानंसमूहालम्बनज्ञानम् तथाचात्मनोपिविशेषणत्वा

अयं घट इति ज्ञानं व्यवसायः घटमहं जानामीति ज्ञानमनुव्यवसायः। अनुव्यवसायः = व्यवसायस्य = ८
व्यवसायानुव्यवसाययोरुभयोरपि ज्ञानत्वाविशेषत्वात् = २ व्यवसायनिष्ठं यद्विषयतावच्छेदकरूपं ज्ञानत्वं तेनानुव्यवसाये विषयित्वसीकिते = ३

निरस्तः

मानत्वादनुव्यवसायोप्यपास्तः ॥ न च व्यवसायभानार्थं सः ॥ तत्प्रदीपवत्तस्य व्यवहारे सजातीया
नपेक्षत्वात् ॥ नहि घटतज्ज्ञानयोरिव व्यवसायानुव्यवसाययोरपि विषयत्वव्यवस्थापकं वैजा
त्यमस्ति व्यक्तिभेदातिरिक्तं वैधर्म्यानभ्युपगमात् ॥ विषयतावच्छेदकरूपेणोभयविषयित्वाभ्यु
पगमे घटतज्ज्ञानयोरपि तज्ज्ञानापत्तिरविशेषात् ॥ ननु यथा घटव्यवहारार्थं घटज्ञानमभ्युपे
यते ॥ तथा घटज्ञानव्यवहारार्थं घटज्ञानविषयं ज्ञानमभ्युपेयं व्यवहारस्य व्यवहर्तव्यज्ञानसा
ध्यत्वात् इति चेत् ॥ कानुपपत्तिस्तथा विनादेवानांप्रियेण स्वप्रकाशवादिनः ॥ नहि व्यवहर्त
व्यभिन्नत्वमपि ज्ञानविशेषणं व्यवहारहेतुतावच्छेदकं गौरवात् ॥ तथा च स्वरज्ञानवत् ॥ योगि
ज्ञानवत्प्रमेयमिति ज्ञानवच्च स्वस्यैव स्वव्यवहारोपपत्तौ न ज्ञानान्तरकल्पनावकाशः ॥ अनुव्यवसा
यस्यापि घटज्ञानव्यवहारहेतुत्वं किं घटज्ञानज्ञानत्वेन किं वा घटज्ञानत्वेनैवेति विवेचनीयं
उभयस्यापि तत्र सत्त्वात् ॥ तत्र घटव्यवहारे घटज्ञानत्वेनैव हेतुतायाः क्लृप्तत्वात्तेनैव रूपेण घ
टज्ञानव्यवहारेपि हेतुतोपपत्तौ न घटज्ञानज्ञानत्वं हेतुतावच्छेदकं ॥ गौरवात्मानाभावाच्च ।
तथा च नानुव्यवसायसिद्धिः एकस्यैव व्यवसायस्य व्यवसातरि व्यवसेये व्यवसाये च व्यवहार
जनकत्वोपपत्तेरिति त्रिपुटीप्रत्यक्षवादिनः प्राभाकराः ॥ औपनिषदास्तु मन्यन्ते ॥ स्वप्रका
शज्ञानरूप एवात्मा न स्वप्रकाशज्ञानाश्रयः कर्तृकर्मविरोधेन तज्ज्ञानानुपपत्तेः ॥ ज्ञानभिन्न
त्वे घटादिवज्जडत्वेन कल्पितत्वापत्तेश्च स्वप्रकाशज्ञानमात्रस्वरूपोप्यात्माविद्योपहितः स
न्साक्षीत्युच्यते ॥ वृत्तिमदन्तःकरणोपहितः प्रमातेत्युच्यते ॥ तस्य च चक्षुरादीनि करणानि सवद

प्रमातुः साधनानि प्रमाणा

ज्ञानस्य ज्ञानं कर्तृ ज्ञानविषयत्वं कर्म = ३

गी॰ टी॰ म॰ द्वि॰ २८

28

अनुव्यवसायस्यापि =

२८

इति

मे

घटाकारो

रादिद्वारांतःकरणपरिणामेनघटादीन्व्याप्यतदाकारो भवति ॥ एकस्मिंश्चांतःकरणपरिणामे घटावच्छिन्नचैतन्यमंतःकरणावच्छिन्नचैतन्यं चैकलोलीभावापन्नं भवति ॥ ततोघटावच्छिन्नचैतन्यप्रमात्रुद्गतत्वाज्ञातेनाशायदपरोक्षं भवति ॥ घटं च स्वावच्छेदकं स्वतादात्म्याध्यासेन भासयति ॥ अंतःकरणपरिणामश्च घटत्वाश्रयोतिस्वच्छः स्वावच्छिन्नेनैव चैतन्येनभास्यत इति अंतःकरणेतद्वृत्तिघटानामपरोक्षता ॥ तदेतदाकारत्रयमहं जानामि

घटावच्छेदकं

अंतवंतइमेदेहा ॥ नित्यस्योक्ताःशरीरिणः १८ ॥

घटमिति ॥ भासकचैतन्यस्यैकरूपत्वेपि घटं प्रतिहेतुत्वापेक्षत्वात्प्रमातृता ॥ अंतःकरणतद्वृत्तीप्रतितद्धेतुत्वनपेक्षत्वात्साक्षितेतिविवेकः ॥ अद्वैतसिद्धौ सिद्धांतबिंदौ च विस्तरः ॥ यस्मादेवं प्रागुक्तन्यायेननित्योविभुरसंसारी सर्वदैकरूप आत्मा तस्मान्नाशशंकया त्वयमेयुद्धे प्राकृप्रवृत्तस्य तवतस्मादुपरतिर्नयुक्तेति युद्धाभ्यनुज्ञयाभगवानाह तस्माद्युद्ध्यस्वभारतेति

मेदिकांतिभिस्सावारुद्रस्यजगतःइसिद्धकथनमनुवादः=२ व्यासस्यकृतिः=भारतस्यश्रवणम्=२

आश्वर्यीगवां सामान्यस्य= ३ अकारप्रत्ययः

दोतोजोपेन=३

गी॰टी॰ म॰ हिं॰ २९

स्यतत्तउपरतेंकारणंशोकमोहौ ॥ तौचविचारजनितेनविज्ञानेनबाधिताविव्यपवादापवादे उत्सर्गस्यस्थितिरितिन्यायेनयुध्यस्वेत्यनेनवादोनविधिः ॥ यथाकर्तृकर्मणोःकृतीत्युत्सर्गः उभयप्राप्तौकर्मणीत्यपवादः अकाकारयोःस्त्रीप्रत्यययोर्योगेनेतिवक्तव्यमितितदपवादः तथाचमममहोब्रह्मणोजिज्ञासेत्यत्रापवादापवादेपुनरुत्सर्गस्थितेःकर्तृकर्मणोःकृ

अ आकारप्रत्ययः

29

अनाशिनोऽप्रमेयस्यतस्माद्युध्यस्वभारत ॥ १८ ॥

ननूभयप्राप्तौकर्मणीतिषष्ठी= उभयप्राप्तौकर्मणीतिप्रोक्तायाषष्ठीसानसमस्यते आश्चर्योगवांदोहरत्र गोदोस इतिनस मासः

तीत्यनेनैवषष्ठीतथाचकर्मणिचेतिनिषेधाप्रसक्तात् ॥ ब्रह्मजिज्ञासेतिकर्मषष्ठीसमासःसि द्धोभवति ॥ कश्चित्तुतस्मादेवविधेर्मोह्यज्ञानकर्मणोःसमुच्चयइतिप्रलपति ॥ तद्युद्धस्ये त्यतोमोक्षस्यज्ञानकर्मसमुच्चयसाध्यत्वाप्रतीतेः ॥ विस्तरेणचैतदग्रेभगवद्गीतावचनविरो

न

[illegible] ॥ २२ ॥ २८ ॥ २२ ॥

२९

उपायः कैवल्याश्

तत्त्वमशोच्यानन्वशोचस्त्वमित्यादिनाभीष्मादिबंधुविच्छेदनिबंधनेशोकेपनीतेपितद्वधकर्तृत्वनिबंधनस्यपापस्यनास्तिप्रतीकारः॥ नहियत्रशोकोनास्तितत्रपापंनास्तीतिनियमः॥ द्वेष्यब्राह्मणवधेशोकाविषयेपापाभावप्रसंगात्॥ अतोहंकर्तात्वंप्रेरकइतिहृद्यपिहिंसानिमित्तपातकापत्तेरयुक्तमिदंवचनंतस्माद्युद्ध्यस्वभारतेतिश्रुत्वाशंकमानंकौंतेयंप्रतितयाऋचापरिहरतिभगवान्॥ यएनमितिएनंप्रकृतंदेहिनंअदृश्यत्वादिगुणकंयोहंतारंहननक्रियायाःकर्तारंवेत्ति॥ अहमस्यहंतेतिविजानाति॥ यश्चैनंमन्यतेहतं॥ हननक्रियायाःकर्मभूतंदेहहननेनहतोहमितिविजानाति॥ तावुभौदेहाभिमानित्वादेनमविकारिणमकारकस्वभावमा
नषट्कारकातिस्वभावोयस्य

य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं॥ उभौ तौ न विजानीतो नायं हंति न हन्यते ॥१९

त्मानंनविजानीतः॥ नविवेकेनजानीतःशास्त्रात्॥ कस्मात्यस्मान्नायंहंतिनहन्यते॥ कर्ताकर्मचनभवतीत्यर्थः॥ अत्रयएनंवेत्तिहंतारंहंतेचेत्तावतिवक्तव्येपदानामाहत्तिर्वाक्यालंकारार्था॥ अथवायएनंवेत्तिहंतारंतार्किकादिभिरात्मनःकर्तृत्वाभ्युपगमात्॥ तथायश्चैनंमन्यतेहतंचार्वाकादिरात्मनोविनाशित्वाभ्युपगमात्॥ तावुभौनविजानीतइतियोज्यंवादिभेदख्यापनायपृथगुपन्यासः॥ अतिमूढतार्किकातरविषयतयावाप्ययमुपदेशः॥ हंताचेन्मन्यतेहंतुंहत

श्रुतिः

निरुक्तं शास्त्रं वेदाङ्गं नस्य कर्तार:

मुनि:
श्लोकेन

कस्मादयमात्माहन्तनक्रियायाः कर्ताकर्मचनभवति। अविक्रियत्वादित्याह द्वितीयेनमन्त्रेण॥ नजायतइति जायतेऽस्तिवर्धतेविपरिणमतेऽपक्षीयतेविनश्यतीति षड्भावविकारा इति वार्ष्यायणिना निरुक्ताः॥ तत्राद्यन्तयोर्निषेधः क्रियते॥ नजायते म्रियतेवेतिवा शब्दः समुच्चयार्थे॥ नजायतेन म्रियतेचेत्यर्थः॥ कस्मादयमात्मा नोत्पद्यते॥ यस्मादयमात्माकदाचित्कस्मिन्नपिकालेनभूत्वा। अभूत्वाततः प्राक्भूयः पुनरपिभविता नयोह्यभूत्वाभवतिसउत्पत्तिलक्षणांविक्रियामनुभवति अयंत्वप्रागपिसत्त्वाद्यतोनोत्पद्यतेऽतोऽजः॥ तथायमात्माभूत्वाप्राक्कदाचिद्भूयःपुनःनभविता

नोति वाक्यविपरिवृत्तिः

नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभविता वानभूयः ५॥

नवाशब्दाद्वाक्यविपरिवृत्तिः॥ योहिप्राग्भूत्वाउत्तरकालेनभवतिसमृतिलक्षणांविक्रियामनुभवति॥ अयंतूत्तरकालेपिसत्त्वाद्यतोनम्रियते॥ अतोनित्यःविनाशायोग्यइत्यर्थः॥ अत्रन भूत्वेत्यत्रसमासाभावेपिनानुपपत्तिः॥ नानुयाजेष्विति वत्॥ भगवतापाणिनिनामहाविभाषाधिकारेनञ्समासपाठात्॥ यत्तुकात्यायनेनोक्तंसमासनित्यत्वाभिप्रा॥ ५ शुभमस्तु।

मुनिना

विकल्पः

नानुयाजेषुयेयजामहं करोतीतिश्रुतिः

विभागाधिकारस्यानर्थकत्वम् सपिण्डितार्थाभिधाने तस्यैव शास्त्रे राकांत्वया पेलनीयार्थाभिधाने वाक्यस्यैव शास्त्रे = तात्पर्यमयं चोध्याश्च श्रूयते = वि

मीमांसाभाष्यकारेण

येनावाच चुतानर्थकं चेति ॥ तद्भगवत्याशीनिवचनविरोधादनादेयं ॥ तदुक्तमाचार्यशबरस्वामिना
अस्तद्वादीहि कात्यायन इति ॥ अत्र न जायते म्रियते वेति श्रुतिः न कदाचित् नायं भूत्वा भविता वा न भूय इति
तदुपपादनम् ॥ अजो नित्य इति ॥ तदुपसंहार इति भागः ॥ आद्यंतयोर्विकारयोर्निषेधेन ॥ म
ध्यवर्तिविकाराणां तन्माप्यानां निषेधे यजोपिगमनादिविकाराणामनुक्तानामप्युपलक्षणाया
पक्षयश्चवृद्धिश्चास्ति शब्देनैव निराक्रियते तत्र वृद्धेः स्यान्नित्यत्वादात्मनो निर्गुणत्वाच्चनस्वरूप
तो गुणतो वा अपक्षयः संभवतीत्युक्तं ॥ शाश्वत इति शाश्वत्सर्वदा भवति ॥ नापक्षीयते नाप

अस्ततंत्रे विरुद्धमप्यर्थीवदति = २ — ते — शाश्वतपुराणशब्दैनैव =

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे २०॥

चीयत इत्यर्थः ॥ यदि नापक्षीयते तर्हि वर्धतामिति नेत्याह ॥ पुराण इति ॥ पुरापि नव एकरूपः
न तु पुनर्नूतनां कांचिदवस्थामनुभवति ॥ यो हि नूतनां कांचिदुपचयावस्थामनुभवति स वर्ध
त इत्युच्यते लोके ॥ अयं तु सर्वदा एकरूपत्वान्नापचीयते नोपचीयते चेत्यर्थः ॥ अस्तित्वविप
रिणामौ तु जन्मविनाशान्तर्भूतत्वात् पृथङ् न निषिद्धौ ॥ यस्मादेवं सर्वविकारशून्य आत्मा त
स्मात् शरीरे हन्यमाने तत्संबद्धोऽपि केनाप्युपायेन न हन्यते न हन्तुं शक्यत इत्युपसंहारः ॥ २०॥

गी॰टी॰
म॰ द्वि॰
३१

नायंहंतिनहन्यते इति प्रतिज्ञायतहन्यते इत्युपपादितं ॥ इदानीनहंतीत्युपपादयन्नुपसंहरति वे
देतिनविनष्टुंशीलंयस्यतमविनाशिनं ॥ अंत्यविकाररहितंतत्रहेतुः अव्ययं ॥ नविद्यतेव्ययो
वयवापचयोगुणापचयोवायस्यतं ॥ अवयवापचयेनगुणापचयेनवाविनाशादर्शनादुभयरहि
तस्यतविनाशःसंभवतीत्यर्थः ॥ नत्वजन्यत्वेतविनाशितवमनुमास्यामहे ॥ तेत्याह ॥ अजमिति ॥ न
जायते इत्यजं ॥ आद्यविकाररहितंतत्रहेतुः ॥ नित्यंसर्वदाविद्यमानं ॥ प्रागविद्यमानस्यहिजन्मदृ
ष्टं ॥ नतुसर्वदासतइत्यभिप्रायः ॥ अथवाअविनाशिनमबाध्यंसत्यमितियावत् ॥ नित्यंसर्वव्यापकं
तत्रहेतुः ॥ अजंअव्ययंजन्मविनाशशून्यं ॥ जायमानस्यविनश्यतश्चसर्वव्यापकत्वसत्यत्वयोगा

वेदाविनाशिनंनित्यं ॥ यएनमजमव्ययं ॥ २१ ॥

त ॥ एवंसर्वविक्रियाशून्यंप्रकृतमेनंदेहिनंस्वमात्मानंयोवेदविजानातिशास्त्राचार्योपदेशाभ्यां
साक्षात्करोति ॥ अहंसर्वविक्रियाशून्यःसर्वभासकःसर्वहेतुरहितःपरमानंदबोधइएवइतिसएवंविद्वा
न्पुरुषःस्वरूपः केहंतिकथंहंतिकिंशब्दआक्षेपे ॥ नकमपिहंति ॥ नकथमपिहंतीत्यर्थः ॥ त
थाकंघातयतिकथंघातयतिकमपिनघातयतिकथमपिनघातयतीत्यर्थः ॥ नहिसर्वविकारशून्य
स्याकर्तृहननक्रियायांकर्तृत्वंसंभवति ॥ तथाचश्रुतिः ॥ आत्मानंचेद्विजानीयादयमस्मीतिपुरुषः
किमिच्छन्कस्यकामायशरीरमनुसंज्वरेद्दिति ॥ शुद्धमात्मानंविदुषस्तदज्ञाननिवेध ॥ श्रीराम ॥

३१

अनुमास्यामहे = ८

२ यो

य

नाध्यासनिवृत्तौ तन्मूलरागद्वेषाद्यभावात्कर्तृत्वभोक्तृत्वाद्यभावं दर्शयति ॥ अयमत्राभिप्रायो भगवतः
वस्तुगत्या कोऽपि न करोति न कारयति च किंचित् ॥ सर्वविक्रियाशून्यस्वभावत्वात् ॥ परंत्वसम इवावि
द्यया कर्तृत्वादिकमात्मन्यभिमन्यते मूढः ॥ तदुक्तं ॥ उभौ तौ न विजानीत इति श्रुतिश्च ॥ ध्यायतीव लेलायतीत्यादिः अत एव सर्वाणि शास्त्राणि अविद्वदधिकारिकाणि ॥ विद्वांस्तु समूलाध्यासबाधात्

सू

नात्मनि कर्तृत्वादिकमभिमन्यते ॥ स्थाणुस्वरूपं विद्वानिव चौरत्वं ॥ अतो विक्रियारहितत्वाद्द्वि
तीयत्वाच्च विद्वान्न करोति कारयति वेत्युच्यते ॥ तथा च श्रुतिः ॥ विद्वान्न बिभेति कुतश्चनेति ॥ अ

द्वा

र्जुनो हि स्वस्मिन्कर्तृत्वं भगवति च कारयितृत्वमध्यस्य हिंसानिमित्तं दोषमुभयत्राप्याशशंके ॥

कथं स पुरुषः पार्थ ॥ कं घातयति हन्ति कं ॥ २१ ॥

भगवानपि विदिताभिप्रायो हन्ति घातयतीति तदुभयमाचिक्षेप ॥ आत्मनि कर्तृत्वं मयि च कारयि
तृत्वमारोप्य प्रत्यवायशंकां माकार्षीरित्यभिप्रायः ॥ अविक्रियत्वदर्शनेनात्मनः कर्तृत्वप्रतिषेधा
त् ॥ सर्वकर्माक्षेपे भगवदभिप्रेते हन्तिरुपलक्षणार्थः पुरःस्फूर्तिकत्वात् ॥ प्रतिषेधहेतोस्तु
ल्यत्वात् ॥ कर्मान्तराभ्यनुज्ञानुपपत्तेः ॥ तथा च वक्ष्यति ॥ तस्य कार्यं न विद्यत इति ॥ अतो न हननमा
क्षेपेण कर्मान्तरं भगवताभ्यनुज्ञायत इति मूढजनजल्पितमपास्तं तस्माद्युध्यस्वेत्यत्र हननस्य भग
वताभ्यनुज्ञानात् बाह्लवकर्तृत्वाद्यभावस्य कर्ममात्रे समत्वादिति दिक् ॥ २१ ॥ शुभमस्तु ॥

दत्तानां

नश्येवमात्मनोऽविनाशित्वेपि देहानामविनाशित्वात् । युद्धस्य च तन्नाशकत्वात् ॥ कथं भीष्मादिदेहानामनेकसुकृतसाधनानां मया युद्धेन विनाशः कार्य इत्याशंकायाउत्तरमाह । वासांसीति जीर्णानि वस्त्राणि विहाय नवानि गृह्णाति विक्रियाशून्य एव नरो यथैतेताव नैव निर्वाहे अपराणीति विशेषणमुत्कर्षातिशयख्यापनार्थं ॥ तेन यथा निकृष्टानि वस्त्राणि विहाय उत्कृष्टानि जनो गृह्णाति इत्येषोचित्यादायातं ॥ तथा जीर्णानि वयसा तपसा च कृशानि भीष्मादिशरीराणि विहाय अन्यानि देवादिशरीराणि सर्वोत्कृष्टानि चिरोपार्जितधर्मफलभोगाय भवति भीष्मादयो हि यावज्जीवं गायत्रीसंयाति सम्यक्गर्भवासादिक्लेशाव्यतिरेकेणाप्नोति ॥ देही प्रकृष्टधर्मानुष्ठानदेहवान् भीष्मादिरित्यर्थः ॥ अन्यान्नवतरकल्याणतरं रूपं कुरुते पित्र्यं वा गांधर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वेत्या

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ॥ तथा शरीराणि वि
हाय जीर्णा न्यन्यानि संयाति नवानि देही ॥ २२॥

दिश्रुतेः ॥ एतदुक्तं भवति ॥ भीष्मादयो हि यावज्जीवं धर्मानुष्ठानक्लेशेनैव जर्जरशरीरा वर्तमानशरीरपातमंतरेण तत्फलभोगाय असमर्थाः ॥ यदि धर्मयुद्धे न स्वर्गप्रतिबंधकानि जर्जरशरीराणि पातयित्वा दिव्यदेहसंपादनेन स्वर्गभोगयोग्याः क्रियेते त्वया तदा त्वं तेषामुपकर्तासि एवेति ॥ दुर्योधनादीनामपि स्वर्गभोगयोग्यदेहसंपादनात् महानुपकार एव ॥ तथा चात्यंतमुपकारके युद्धे अपकारकत्वभ्रमं मा कार्षीरिति ॥ अपराणि अन्यानि संयातीति पदद्वयवशात् विवक्षितेऽभिप्राय एवमभ्यूहितः ॥ अनेन दृष्टांतेनाविकृतत्वप्रतिपादनमात्मनः क्रियत इति तु प्राचां व्याख्यानमतिस्पष्टं ॥ २२ ॥ ॥ ॥ ॥

माचार्यादीनां

ननु देहनाशे तदभ्यंतरवर्तिन आत्मनः कुतो न विनाशो गृहदाहे तदंतरवर्तिपुरुषवदित्यत आ
ह ॥ नैनमिति शास्त्राणि असादीनि अनितीक्ष्णान्यपि ॥ एवंप्रकृतमात्मानं न छिंदंति अवय
वविभागेन द्विधा कर्तुं न शक्नुवंति ॥ तथा पावकोऽग्निरतिप्रज्वलितोऽपि एनं न भस्मीकर्तुं शक्नो
ति ॥ न चैनमापोऽत्यंतवेगवत्योऽपि आर्द्रीकरणेन विश्लिष्टावयवं कर्तुं शक्नुवंति ॥ मारुतो वा

नैनं छिंदंति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥२३॥

युरतिप्रबलोऽपि एनं नीरसं कर्तुं शक्नोति ॥ सर्वनाशकाद्युपेक्षप्रकृते युद्धसमये शस्त्रादीनां प्रकृत
त्वादवयुत्यानुवादेनोपन्यासः पृथिव्यप्तेजोवायूनामेव नाशकत्वप्रसिद्धेस्तेषामेवोपन्या
सो नाकाशस्य ॥२३॥ ॥ राम ॥ कृष्ण ॥ शिवाय नमः ॥ शुभमस्तु ॥ ॥

गी॰ टी॰
म॰ द्वि॰
३३

वादी

33

शस्त्रादीनां तन्नाशकत्वासामर्थ्यं तस्य तज्जनितनाशानर्हत्वे हेतुमाह ॥ अच्छेद्योऽयमिति यतोऽच्छेद्योऽय
मतो नैनं छिन्दन्ति शस्त्राणि अदाह्योऽयं यतः अतो नैनं दहति पावकः ॥ यतोऽक्लेद्योऽयमतो न चैनं क्ले
दयन्त्यापः ॥ यतोऽशोष्योऽयमतो नैनं शोषयति मारुत इति क्रमेण योजना एवकारः प्रत्येकं सं
बध्यमानोऽच्छेद्यत्वाद्यवधारणार्थः ॥ चः समुच्चये हेतौ वाच्छेदाद्यनर्हत्वे तन्माहात्म्यार्थेन ॥ नित्यो
यं पूर्वापरकोटिरहितोऽतो नत्वाद्यः ॥ असर्वगतत्वे हि नित्यत्वं स्याद्यावद्विकारं तु विभाग इति न्याया
त् ॥ पराभ्युपगतपरमाणुवादीनामनभ्युपगमात् ॥ अयं तु सर्वगतो विभुरतो नित्य एव ॥ एतेना

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ॥

प्राप्यत्वं पराकृतं ॥ यदि चायं विकारी स्यात्तदा सर्वगतो न स्यात् ॥ अयं तु स्थाणुरविकारी अतः स
र्वगत एव ॥ एतेन विकार्यत्वमपाकृतं ॥ यदि चायं चलः क्रियावान्स्यात्तदा विकारी स्यात् घटादिव
त् ॥ अयं त्वचलोऽतो न विकारी ॥ एतेन संस्कार्यत्वं निराकृतं ॥ पूर्वावस्थापरित्यागेनावस्थान्तरा
पत्तिर्विक्रिया । अवस्थैक्येऽपि चलनमात्रं क्रियेति विशेषः ॥ यस्मादेवं तस्मात्सनातनोऽयं सर्वदै
करूपः ॥ न कस्याश्चिदपि क्रियायाः कर्मेत्यर्थः ॥ उत्पत्त्याप्तिविकृतिसंस्कृतयस्तत्क्रियाफल
योगे हि कर्मत्वं स्यात् अयं तु नित्यत्वान्नोत्पाद्यः ॥ ॐ नमो भगवते वासुदेवाय नमः शिवाय

३३

अनित्यस्यैव घटादेः कृत्यायत्वात् ॥ सर्वगतत्वान्न प्राप्यः परिच्छिन्नस्यैव पयआदेः प्राप्यत्वात्
स्थाणुत्वादविकार्यः विक्रियावतो घृतादेरेव विकार्यत्वात् ॥ अचलत्वादसंस्कार्यः सक्रिय
स्यैव दर्पणादेः संस्कार्यत्वात् ॥ तथा च श्रुतयः आकाशवत्सर्वगतश्च नित्यः वृक्ष इव स्तब्धो
दिवि तिष्ठत्येकः ॥ निष्कलं निष्क्रियं शान्तमित्याद्याः यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यो

नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ꣸ २४॥

प्सु तिष्ठन्नग्नेरन्तरो यस्तेजसि तिष्ठंस्तेजसोऽन्तरो यो वायौ तिष्ठन्वायोरन्तर इत्याद्या च श्रुतिः सर्व
गतस्य सर्वान्तर्यामितया तदविषयत्वं दर्शयति ॥ यो हि शस्त्रादौ न तिष्ठति तं शस्त्रादयश्छिंद
ति ॥ अयं तु शस्त्रादीनां सत्तास्फूर्तिप्रदत्वेन तदन्तरकस्तदंतर्यामी ॥ अतः कथमेनं शस्त्रादी
नि स्वव्यापारविषयीकुर्युरित्यभिप्रायः ॥ अत्र येन सूर्यस्तपति तेजसेद्ध इत्यादिश्रुतयोऽन
संधेयाः ॥ सप्तमाध्याये च प्रकटीकरिष्यति श्रीभगवानिति दिक् ꣸ २४ ॥ ꣸ श्रीराम ॥

गी॰ टी॰ म॰ द्वि॰ २५

क्षेयत्वादिग्राहकप्रमाणाभावादपि तदभाव इत्याह अव्यक्तोयमित्यादेरर्थेन ॥ योहींद्रियगोचरोभ
वति स प्रत्यक्षत्वात् व्यक्त इत्युच्यते ॥ अयं तु रूपादिहीनत्वान्न तथा ॥ अतो न प्रत्यक्षं तत्र छेद्यत्वा
दिग्राहकमित्यर्थः ॥ प्रत्यक्षाभावेप्यनुमानं स्यादित्यत आह ॥ अचिंत्योयं ॥ चिंत्योऽनुमेयः न हि
लक्षणोयं ॥ क्वचित्प्रत्यक्षो हि वह्न्यादिर्गृहीतव्याप्तिकस्य धूमादेर्दर्शनात् क्वचिदनुमेयो
भवति ॥ अप्रत्यक्षे तु व्याप्तिग्रहणासंभवान्नानुमेयत्वमिति भावः अप्रत्यक्षस्यापींद्रियादेः सा

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते ॥

मान्यतोदृष्टानुमानविषयत्वं दृष्टमत आह ॥ अविकार्योयं यद्धि विक्रियावच्चक्षुरादिकं त
त्स्वकार्यान्यथानुपपत्त्या कल्प्यमानमर्थापत्तेः ॥ सामान्यतोदृष्टानुमानस्य च विषयो भ
वति ॥ अयं तु न विकार्यो न विक्रियावान् ॥ अतो नार्थापत्तेः सामान्यतोदृष्टस्य वा विषय इ
त्यर्थः ॥ लौकिकशब्दस्यापि प्रत्यक्षादिपूर्वकत्वात्तन्निषेधेनैव निषेधः ॥ ननु वेदेनैव तत्र
छेद्यत्वादि ग्रहीष्यत इत्यत आह ॥ उच्यते ॥ वेदेन सोपकरणो नस्य छे ॥ २ ॥ शुभमस्तु ॥ २५

जीवनैवपुरुषस्य

जीवनस्यैवनस्य ... दर्शनेन व क्रिभावत्वा हृष्ट कल्प
नादर्थापत्तेरभिमताबुद्धानाम् = ८

याह्यक्तादिरूपप्रत्ययमस्यैतेन तात्पर्येण प्रतिपाद्यते ॥ अतो न वेदस्य तत्प्रतिपादकस्यापि छेद्यत्वादिप्र
तिपादकत्वमित्यर्थः ॥ अत्रैव नैनं छिन्दन्तीत्यत्र शस्त्रादीनां तन्नाशकसामर्थ्याभाव उक्तः ॥ अच्छेद्योय
मित्यादौ तस्य छेदादिकर्मत्वायोग्यत्वमुक्तं ॥ अव्यक्तोयमित्यत्र तच्छेदादिग्राहकमानाभाव उक्त
इत्यपौनरुक्त्यं द्रष्टव्यं ॥ वेदाविनाशिनमित्यादीनां श्लोकानामर्थतः शब्दतश्चापौनरुक्त्यं ।
भाष्यकृद्भिः परिहृतं दुर्बोधत्वादात्मवस्तुनः पुनः पुनः प्रसङ्गमापाद्य शब्दान्तरेण तदेव वस्तु

तस्मादेवं विदित्वैनं ॥ नानुशोचितुमर्हसि ॥ २५

निरूपयति भगवान्वासुदेवः ॥ कथं तु नाम संसारिणां बुद्धिगोचरमापन्नं तत्त्वं संसारनिवृत्तये स्या
दिति वदद्भिः ॥ एवं पूर्वोक्तयुक्तिभिरात्मनो नित्यत्वे निर्विकारत्वे च सिद्धे तव शोको नोपपन्न इ
त्युपसंहरति ॥ तस्मादित्यर्धेन ॥ यतो दृशात्मस्वरूपवेदनस्य शोककारणनिवर्तकत्वात् ।
तस्मिन्सति शोको नोचितो निमित्ताकारणाभावे कार्याभावस्यावश्यकत्वात् ॥ तेनात्मानम ।
विदित्वा यदन्वशोचस्तद्युक्तमेवआत्मानं विदित्वा तु नानुशोचितुमर्हसीत्यभिप्रायः ॥ २५

वेदने

गी·टी·
म·हि·
३५
दिगम्बराः
35

एवमात्मनोनिर्विकारत्वेनाशोच्यत्वमुक्त्वेदानींविकारवत्त्वमभ्युपेत्याग्रिमश्लोकद्वयेनाशोच्यत्वंप्र
तिपादयतिभगवान् ॥ तत्रात्माज्ञानस्वरूपःप्रतिक्षणविनाशीतिसौगताः ॥ देहएवात्मासचस्थि
रोऽप्यनुक्षणपरिणामीजायतेनश्यतिचेतिप्रत्यक्षसिद्धमेवैतदितिलोकायतिकाः ॥ देहातिरि
क्तोऽपिदेहेनसहैवजायतेनश्यतिचेत्यन्ये ॥ सर्गाद्यकालएवाकाशवज्जायतेदेहभेदेप्यनुवर्तमा
नएवाकल्पस्थायीनश्यतिप्रलयइत्यपरे ॥ नित्यएवात्माजायतेम्रियतेचेतितार्किकाः ॥ तथाहि
प्रेत्यभावोजन्मसचापूर्वदेहेन्द्रियादिसंबंधः ॥ एवंमरणमपिपूर्वदेहेन्द्रियादिविच्छेदः ॥ इदं

अथचैनंनित्यजातं ॥ नित्यंवामन्यसेमृतं ६ ॥

चोभयंधर्माधर्मनिमित्तत्वात्तदाधारस्यनित्यस्यैवमन्तव्यं ॥ अनित्यस्यतुकृतहान्यकृताभ्याग
मप्रसंगेनधर्माधर्माधारत्वानुपपत्तेःनजन्ममरणेमुख्येइतिवदंति ॥ नित्यस्याप्यात्मनःकर्ण
शष्कुलीजन्मनाऽऽकाशस्येवदेहजन्मनाजन्मतन्नाशाच्चमरणं ॥ तदुभयमौपाधिकममु
ख्यमेवेत्यन्ये ॥ तत्रानित्यत्वपक्षेऽपिशोच्यत्वमात्मनोनिषेधति ॥ अथेतिपक्षांतरे ॥ चोऽप्यर्थे ॥
सौगतलोकायतिकादिगम्बराभिमते =
यदिदुर्बोधत्वादात्मवस्तुनोऽसकृच्छ्रवणाद्यवधारणासामर्थ्यान्मदुक्तपक्षानङ्गीकारेण
पक्षांतरमभ्युपैषितत्राप्यनित्यत्वपक्षमेवाश्रित्य ॥ ६ ॥ कृष्णायनमोनमः ॥ शुभमस्तु ॥

सौगते

यद्येनमात्मानं नित्यं जातं नित्यं मृतं वा मन्यसे ॥ वाशब्दश्चार्थे क्षणिकत्वपक्षे नित्यं प्रतिक्षणं ॥ पक्षांतरे श्रावश्यकत्वान्नित्यं नियतं ॥ जातोयं मृतोयमिति लौकिकप्रत्ययवशेन यदि कल्पयसि तथापि हे महाबाहो ॥ पुरुषधौरेयकचैः ...धौरेय इति सोपहासं संबोधनम् ताभ्युपगमात् त्वमेनात्मानं शोचितुं नार्हसि । यदि न संभवतीति मानकंपवा ॥ एवं च्यहोवतमहत्पापं कर्तुं व्यवसितावयमित्यादि यथा शोचसि एवं प्रकारमनुशोकं कर्तुं स्वयमपि त्वं नार्हसि एवं सनृनाहेंसेन योग्यो भवसि । क्ष

तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥२६॥

णिकत्वपक्षे देहात्मवादपक्षे ॥ देहेन सह जन्मविनाशपक्षे च जन्मांतराभावेन पापभयासंभवात् पापभयेनैव खलु त्वमनुशोचसि तच्चेतादृशे दर्शने न संभवतीत्यर्थः ॥ क्षणिकत्वपक्षे च दृष्टमपि दुःखं न संभवति वंधुविनाशदर्शित्वाभावादित्यपि कं ॥ पक्षांतरे दृष्टदुःखनिमित्तं शोकमभ्यनुज्ञातमेवं कारःदृष्टदुःखनिमित्तशोकसंभवेप्यदृष्टदुःखनिमित्तः शोकः सर्वथानो

ननु जीवन्मुक्तस्य मृतस्य न जन्मातो ध्रुवं जन्म मृतस्येत्यस्य व्यभिचारो नत्राह ॥ ५
सानुशयस्य सवासनस्य जीवस्यैव ध्रुवं जन्म न जीवन्मुक्तस्येति न तत्र व्यभिचारः = ५

गी॰ टी॰ म॰ द्वि॰ ३६

नन्वात्मनश्चा(प्रलय)तसंसारावस्थायित्वपक्षे नित्यत्वपक्षे च दृष्टादृष्टदुःखसंभवात्तद्भयेन शोचामीत्यत आह द्वितीयश्लोकेन ॥ जातस्येति हि यस्माज्जातस्य स्वकृतधर्माधर्मादिवशाल्लब्धशरीरेन्द्रियादिसंबंधस्य स्थिरस्यात्मनो ध्रुवोऽवश्यंभावी मृत्युः तच्छरीरादिविच्छेदः ॥ तदारंभककर्मक्षयनिमित्तः ॥ संयोगस्य वियोगावसानत्वात् ॥ तथा ध्रुवं जन्म मृतस्य च ॥ प्राग्देहकृतकर्मफलोपभोगार्थं मृतानुशयस्यैव प्रस्तुतत्वान्न जीवन्मुक्ते व्यभिचारः ॥ तस्मादेवमपरिहार्येऽर्थे परिहर्तुमशक्येऽस्मिन् जन्ममरणलक्षणेऽर्थे विषये त्वमेवंविद्वान् न शोचितुमर्हसि ॥ तथा च वक्ष्यति ॥ ऋतेऽपि त्वां न भविष्यंति सर्वे इति ॥ यदि हि त्वया युद्धे न हन्यमाना एते जीवेयुरेव तदा युद्धाय शोकस्तवोचितः स्या

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥ २७ ॥

त् ॥ एते तु कर्मक्षयात्स्वयमेव म्रियंत इति तत्परिहारासमर्थस्य तव दृष्टदुःखनिमित्तः शोको नोचित इति भावः ॥ एवमदृष्टदुःखनिमित्तेऽपि शोके ॥ तस्मादपरिहार्येऽर्थ इत्येवोत्तरं ॥ युद्धाख्यं हि कर्म क्षत्रियस्य नियतमग्निहोत्रादिवत् ॥ तच्च युद्धं संग्रामाहारत्वस्माद्धातोर्निष्पन्नं शत्रुप्राणवियोगानुकूलशस्त्रप्रहाररूपं विहितत्वादग्नीषोमीयादिहिंसावन्न प्रत्यवायजनकं ॥ तथा च गौतमः स्मरति ॥ न दोषो हिंसायामाहवे ॥ अन्यत्र व्यश्वसारथ्यनायुधकृतांजलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्य इति ॥ ब्राह्मणग्रहणाच्चात्रायोद्धृब्राह्मणविषयं गवादिप्रायपाठादिति स्थितं ॥ एतच्च स्वधर्ममपि चावेक्ष्येत्यत्र स्पष्टीकरिष्यते ॥ न ॥ २७ ॥ ॥

क

३६

याचयुद्धलक्षणोर्थः अग्निहोत्रादिवद्विहितत्वादपरिहार्यो यपरिहर्त्तुमशक्यः ॥ तदकरणे प्रत्यवाय
प्रसंगात् ॥ तमहं दृष्टदुःखभयेन शोचितुं नार्हसीति पूर्ववत् ॥ यदि तु युद्धाख्यं कर्म काम्यमेव ।
यमाहवेषु युध्यंते भूम्यर्थमपराङ्मुखाः ॥ अकूटैरायुधैर्यांति ते स्वर्गं योगिनो यथेति याज्ञ
वल्क्यवचनात् ॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीमिति भगवद्वचनाच्च तदापि प्रार
ब्धस्य काम्यस्यापि अवश्य परिसमापनीयत्वेन नित्यतुल्यत्वात् याचयुद्धस्य प्रारब्धत्वादपरिहार्यत्वं

तस्मादपरिहार्येर्थे ॥ न त्वं शोचितुमर्हसि ॥ २७ ॥

तुल्यमेव ॥ अथवात्मनित्यत्वपक्षएव श्लोकद्वयं ॥ अर्जुनस्य परमास्तिकस्य वेदबाह्यमताभ्यु
पगमासंभवात् अत्र योजना तु नित्यस्यात्मनो देहेंद्रियादिसंबंधवशाज्जातस्येति नित्यजातः तमे।
नमात्मानं नित्यमपि संतं जातं चेन्मन्यसे ॥ तथा नित्यमपि संतं मृतं चेन्मन्यसे ॥ तथापि त्वं नानुशो
चितुमर्हसीति प्रतिज्ञायां हेतुमाह ॥ जातस्य हीत्यादिना ॥ नित्यस्य जातत्वं मृतत्वं च प्राग्व्या
ख्यातं ॥ स्पष्टमन्यत् ॥ भाष्यमप्यस्मिन् पक्षे योजनीयं ॥ २७ ॥ श्रीरामचंद्राय नमः ॥ ॥

दृष्टिरेवसृष्टिः दोषवशादुक्तस्तेसति ज्ञानैकसत्त्वदृष्टिसृष्टित्वं यथा शुक्ति रजतादेर्यावदज्ञानं स्थितिस्तथा सर्वं जगत् इतिभावः ॥५

तदेवं सर्वप्रकारेणात्मनोऽशोच्यत्वमुपपादितं ॥ अथेदानीमात्मनोऽशोच्यत्वेपिभूतसंघातात्मकानि शरीराण्युद्दिश्य शोचामीत्यर्जुनशंकामपनुदति भगवान् ॥ अव्यक्तादीनीति आदौ जन्मनः प्राक् अव्यक्तान्यनुपलब्धानि भूतानि पृथिव्यादिभूतमयानि शरीराणि ॥ मध्ये जन्मानंतरं मरणात्प्राक् व्यक्तानि उपलब्धानि संति ॥ निधने पुनरव्यक्तान्येव भवंति यथा स्वप्नेन्द्रजालादौ प्रतिभासमात्रजीवनानि शुक्तिरूप्यादिवत्तत्तज्ज्ञानात्प्रागूर्ध्वं वास्थितानि दृष्टिस्वाभ्युपगमात् ॥ तथा च ॥ आदावंते च यन्नास्ति वर्तमानेपि तत्तथेति न्यायेन मध्येपि न संत्येवैतानि ॥ नासतो विद्यते भाव इति ह्युक्तेश्च ।

अव्यक्तादीनि भूतानि ॥ व्यक्तमध्यानि भारत ॥

एवं सति तत्र तेषु मिथ्याभूतेषु स्वप्नवत्तत्त्वेकेषु भूतेषु का परिदेवना को वा दुःखप्रलापः न कोप्युचित इत्यर्थः ॥ नहि स्वप्ने वस्तु विधायान् वपून् उपलभ्य प्रतिबुद्धस्तद्विच्छेदेन शोचति दृष्टश्च जनोपि तदेवोक्तं पुराणे ॥ अदर्शनादापतितः पुनश्चादर्शनं गतः ॥ भूतसंघ इति शेषः ॥ तथा च शरीराण्युद्दिश्य शोको नोचित इति भावः ॥ आकाशादि महाभूताभिप्रायेण वा श्लोकयोजना ॥ अव्यक्तमव्याकृतं नवियोपहितं चैतन्यमादिः प्रागवस्था येषां तानि ॥ तथाव्यक्तं नामरूपाभ्यामेव विषयकाभ्यां प्रक

गी॰टी॰ म॰ हि॰ ३७

37

परमार्थसदात्मनां मध्ये स्थितावस्था येषां तानि ह्यपानि भूतान्याकाशादीनि ॥ अव्यक्तनिधनान्येव अ-
व्यक्ते स्वकारणेऽदर्शनं दीर्घ्याटादीनां निधनं प्रलयो येषां तेषु भूतेषु का परिदेवनेति पूर्ववत् ॥ तथा
च श्रुतिः ॥ तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतेत्यादिरव्यक्तोपादानतां स्व-
स्य प्रपंचस्य दर्शयति ॥ लयस्थानत्वं तु तस्यार्थसिद्धं कारणएव कार्यलयस्य दर्शनात् ॥ ग्रं

अव्यक्तनिधनान्येव ॥ तत्र का परिदेवना ॥ २८ ॥

यां तेरविप्लवः ॥ तथा चाज्ञानकल्पितत्वेन तत्त्वान्याकाशादिभूतान्युद्दिश्य शोको नोचित इत्युक्त-
न्नकार्योऽप्युद्दिश्य नोचित इति किमु वक्तव्यमिति भावः ॥ अथवा सर्वदा तेषामव्यक्तरूपेणाविद्य-
मानत्वाद्विच्छेदाभावे न तन्निमित्तः ॥ प्रलापो नोचित इत्यर्थः भारतेत्यनेन संबोधयन् सुहृद्वं-
शोद्भवत्वेन शास्त्रीयमर्थं प्रतिपत्तुमर्हसि ॥ किमिति न प्रतिपद्यस इति सूचयति ॥ २८ ॥

गी॰ टी॰
म॰ द्वि॰
३८

38

ननु विद्वांसो बहवः ॥ शोचंति ॥ तत्किं मामेव पुनः पुनरेवमुपालभसे ॥ अन्यच्च ॥ वक्तुरेव हि तज्जाड्यं श्रोता
यत्र न बुध्यत इति न्यायात् ॥ त्वदुक्तार्थाप्रतिपत्तिरपि मम न दोषः ॥ तत्रान्येषामपि तवेवात्मापरिज्ञा
नादेव शोकः आत्मप्रतिपादकशास्त्रार्थाप्रतिपत्तिश्च तवाप्यन्येषामिव तस्याशयदोषादिति नोक्तदोष-
द्वयमित्यभिप्रेत्यात्मनो दुर्विज्ञेयतामाह ॥ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ एनं प्रकृतं देहिनमाश्चर्येणाद्भुते
न तुल्यतया वर्तमाने ॥ अविद्यकं नानाविधविरुद्धधर्मवत्तयासंतमपि संतमिव ॥ स्वप्रकाशचैत-
न्यरूपमपि जडमिवानंदघनमपि दुःखितमिव निर्विकारमपि सविकारमिव ॥ नित्यमप्यनित्यमि-
व ॥ प्रकाशमानमप्यप्रकाशमानमिव ॥ ब्रह्माभिन्नमपि तद्भिन्नमिव ॥ मुक्तमपि बद्धमिव ॥ अ-
द्वितीयमपि सद्वितीयमिवासंभावितविविधानेकाकारप्रतीतिविषयं पश्यति ॥ शास्त्राचार्योप-
देशाभ्यामविद्यकसर्वद्वैतनिषेधेन परमात्मस्वरूपमात्राकारायां वेदांतमहावाक्यजन्यायां स-
र्वसुकृतफलभूतायामंतःकरणवृत्तौ प्रतिफलितं समाधिपरिपाके सम्यक् साक्षात्करोति कश्चि-
त् ॥ शमदमादिसाधनसंपन्नश्चरमशरीरः कश्चिदेव न तु सर्वः ॥ तथा कश्चिदेनं यत्पश्यति तदाश्च-
र्यवदिति क्रियाविशेषणं ॥ आत्मदर्शनमप्याश्चर्यवदेव यत्स्वरूपतो मिथ्याभूतमपि सत्यस्यव्य-
जकं ॥ अविद्यकमप्यविद्यायाविद्यातकं ॥ अविद्यामुपघ्नत्तत्कार्यतया स्वात्मानमप्युपहंतीति
तथा ॥ यः कश्चिदेनं पश्यति स आश्चर्यवदिति कर्तृविशेषणं यतोऽसौ निवृत्ताविद्यातत्कार्योऽपि प्रार-
ब्धकर्मप्राबल्यात्तद्वानिव व्यवहरति ॥ सर्वदा समाधिनिष्ठोऽपि व्युत्तिष्ठति ॥ व्युत्थितोऽपि पुनः समा-

श्च

२९ ३८

व

सकललोकस्पृहणीयो। तस्मादाश्चर्यवद्भवति॥ तदेवं त्रयमपि आश्चर्यमात्मा तज्ज्ञानं तज्ज्ञाता चेति। परम
दुर्विज्ञेयमात्मानं त्वं कथमनायासेन जानीया इत्यभिप्रायः॥ एवमुपदेष्टुरभावादप्यात्मा दुर्विज्ञेयः
यो ह्यात्मानं जानाति स एव तमन्यस्मै ब्रूयात्॥ अज्ञस्योपदेष्टृत्वासंभवात्॥ ज्ञानं तु समाहितचि
त्तः प्रायेण कथं ब्रवीतु॥ व्युत्थितचित्तोऽपि परेण ज्ञातुमशक्यः॥ यथा कश्चिद्विज्ञातोऽपि लाभपू
जाख्यात्यादिप्रयोजनानपेक्षत्वान्न ब्रवीत्येव॥ कश्चित्कारुण्यमात्रेणाब्रुवंस्तु परमेश्वरवदन्तं
तद्दुर्लभ एवेत्याह॥ आश्चर्यवद्वदति तथैव चान्य इति॥ यथा जानाति तथैव वदति एनमित्यनेक
र्मणार्थे स्वकारः॥ स चान्यः सर्वजनविलक्षणः॥ ननु यः पश्यति ततोऽन्य इति व्याचानात्।
अत्रापि कर्मणि क्रियायां कर्तरि चाश्चर्यवदिति योज्यं॥ तत्र कर्मणः कर्तुश्च प्रागाश्चर्यवत्त्वं व्या
ख्यातं॥ क्रियायास्तु व्याख्यायते॥ सर्वशब्दावाच्यस्य शुद्धस्यात्मनो यद्वचनं तदाश्चर्यवत् तथा च
श्रुतिः॥ यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति केनापि शब्देनावाच्यस्य शुद्धस्यात्मनो विशिष्ट
शक्तेन पदेन जहदजहत्स्वार्थलक्षणया कल्पितसंबंधेन लक्षितावच्छेदकमन्तरेणैव प्रतिपाद
नं॥ तदपि निर्विकल्पकसाक्षात्काररूपमत्याश्चर्यमित्यर्थः॥ अथवा विना शक्तिं विना लक्षणां
विना संबंधं पांतरं शुद्धात्मव्यापकवाक्यवत् तत्त्वमस्यादिवाक्यैर्न यदात्मतत्त्वप्रतिपादनं तदाश्चर्यव
त्॥ शब्दशक्तेरचिन्त्यत्वात् न [illegible] विना संबंधं बोधनेति प्रसंगः लक्षणापक्षेऽपि तुल्यत्वात्॥ शक्या
त्॥ संबंधस्यानेकसाधारणत्वात्॥ तात्पर्यविशेषान्नियम इति चेत्॥ तस्यापि सर्वत्राप्यविशेषात्
कश्चिदेव तात्पर्यविशेषमवधारयति नेम ॥ २॥

विशिष्टेनोपा
धिके व्यक्तिं
शक्ते शक्याभि
धानेन =

च

गी॰ टी॰
म॰ द्वि॰
३९

39

वेशतिचेत्॥ हंततर्हिगुरुमुखगतएवकश्चिद्विशेषोनिर्दोषत्वरूपोनियामकः सचास्मिन्नद्वैतेऽपिनदृष्टवा
चितः॥ तथायाहशास्त्रमुखुत्वात्कल्पस्यतात्पर्यात्तुसंपादनसुरः सुरसलक्षणयावाक्यार्थबोधोभव
त्विरंगीक्रियते॥ ताहशास्येवकेवलः शाब्दविशेषोरंवड्साक्षात्कारंविनापिसंभवंयेनजनयतीति।
किमनुपपन्नं॥ यत्तस्मिन्नद्वैतशब्दस्याविषयत्वात् यतोवाचोनिवर्तन्ते इतिश्रुतेरनुपपन्नं॥ अ
यंचभगवदभिप्रायोवार्तिककारैः प्रपंचितः॥ दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः॥ श
ब्दशक्तेरचिंत्यत्वाद्विद्मस्तंमोहहानतः॥ अगृहीत्वैवसंबंधमभिधानाभिधेययोः॥ हित्वानिद्रांप्र
बुध्यंतेसुषुप्तेबोधिताःपरैः॥ जाग्रद्वन्नयतःशब्दंसुषुप्तेवेत्तिकश्चन॥ ध्वस्तेतोज्ञानतोज्ञानेब्र
ह्मास्मीतिभवेत्फलं॥ अविद्याघातिनःशब्दाद्याहंब्रह्मेतिधीर्भवेत्॥ नश्यत्यविद्ययासार्धंहत्वारो
गमिवौषधमित्यादिनाग्रंथेन॥ तदेवंवचनविषयस्यैवतत्त्वंचनक्रियायाश्चात्माश्चर्यरूपत्वादा
त्मनोदुर्विज्ञानत्वमुक्त्वाश्रोतृदुर्लभत्वादपितदाह॥ आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवे
देति॥ अन्योद्रष्टुर्वक्तुश्चमुक्तोहिलक्षणोमुमुक्षुर्वक्तुरेवब्रह्मविदंविधिवदुपसन्नःशृणोति
श्रवणाख्यंविचारविषयीकरोतिवेदांतवाक्यतात्पर्यनिश्चयेनावधारयतीतियावत्॥ श्रुत्वापिचैनंम
नननिदिध्यासनपरिपाकाद्वेदापिसाक्षात्करोत्यपिआश्चर्यवत्॥ तथाच॥ आश्चर्यवत्पश्य
तिकश्चिदेनमित्यत्रव्याख्याते॥ अत्रापिकर्तुराश्चर्यरूपत्वमनेकजन्मानुष्ठितसुकृतक्षालि
तमनोमलतयातिदुर्लभत्वात्॥ तथाचवक्ष्यति॥ मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये॥ यततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतः इति॥ श्रवणायापिबहुभिर्योनलभ्यः॥॥

ल
ना
ग
३९

असति प्रतिबंधे ऐहिकमेव तज्ज्ञानं जन्म भवति सति तु प्रतिबंधे जन्मांतरे तद्भवति गर्भस्थ एव वामदेवः प्रति
बुबुधे इति श्रुतौ तथा दर्शितत्वात् प्रतिबंधस्य भोगादिना निवृत्तौ जन्मांतरसंचितसाधनैरेव जातिस्मरन्यायेनो
पस्थितैर्वामदेवादीनां गर्भादावेव तत्त्वज्ञानोत्पत्तिदर्शनादित्यर्थः तस्मादिद्वितीयस्मिन्निरिहैव जन्मांतर एव वा इति न नियमसंभव इति
भावः ५

शृण्वंतोपि बहवो यं न विद्युः ॥ आश्चर्यो वक्ता कुशलोस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति श्रुते
श्च ॥ एवं श्रवणज्ञातव्ययोराश्चर्यत्वमागवद्व्याख्येयं ॥ ननु यः श्रवणमननादिकं करोति स आत्मा
नं वेदेति किमाश्चर्यमत आह ॥ न चैव कश्चिदिति चकारः क्रियाकर्मपदयोरनुषंगार्थः ॥ कश्चिदे
नं नैव वेद श्रवणादिकं कुर्वन्नपि ॥ तदकुर्वंस्तु न वेदेति किमु वक्तव्यं ॥ ऐहिकमप्रस्तुतप्रतिबंधे ।
तद्दर्शनादिति न्यायात् ॥ उक्तं च वार्तिककारैः कुतस्तज्ज्ञानमिति चेत्तद्धि बंधपरिक्षयात् ॥ असा

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः २९ ॥ ॥

वपि च भूतो वा भावी वा वर्तते तथैवेति ॥ श्रवणादि कुर्वतामपि प्रतिबंधपरिक्षयादेव ज्ञानं जायतेऽन्य
था न तस्य च प्रतिबंधपरिक्षयः ॥ कस्यचिद्भूत एव यथा हिरण्यगर्भस्य ॥ कस्यचिद्भावी यथा वाम
देवस्य ॥ कस्यचिद्वर्तते यथा श्वेतकेतोः ॥ तथा च प्रतिबंधक्षयस्यातिदुर्लभत्वात् ॥ ज्ञानमत्यंतेदु

गीति

गी॰टी॰ म॰ द्वि॰ ५॰

साद्व्याव्यापस्य कर्मणाऽ इति स्मृतेश्च ॥ दुर्विज्ञेयोऽयमात्मेति निर्गलितोऽर्थः ॥ यदि तु श्रुत्वाप्येनं वेद न चैव कश्चिदिति एवं व्याख्यायेत ॥ तदाश्चर्यो ज्ञाता कुशलानुशिष्ट इति श्रुत्येकवाक्यता न स्यात् ॥ यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत इति भगवद्वचनविरोधश्चेति विद्वद्भिर्विनयः कर्तव्यः ॥ श्रुत्वाप्येनं वेद न चैव कश्चिदित्यस्य सर्वत्र संबंधः ॥ कश्चिदेनं न पश्यति न वदति न शृणोति

॥ आश्चर्यवच्चैनमन्यः शृणोति ॥

॥ श्रुत्वाप्येनं वेद न चैव कश्चित् ॥

श्रुत्वापि न वेदेति ॥ पंचप्रकारा उक्ताः ॥ कश्चिन्न पश्यत्येव न वदति कश्चित्पश्यति च वदति च ।
कश्चिदेनं शृणोति च तदर्थं जानाति च कश्चित् श्रुत्वापि न जानाति ॥ कश्चित्तु सर्वे बहिर्भूत इति ॥ अविद्वत्त्वादेतस्य संभावनाविपरीतभावनाभिभूतत्वादाश्चर्यतुल्यत्वे दर्शनश्रवणोक्तिषु इति निगदव्याख्यातः श्लोकः चतुर्थपादे तत्र श्रुत्वा श्रुत्वापीति योजना ॥ २९ ॥ राम

न पश्यति न वदति न शृणोति =

५॰

इदानीं सर्वप्राणिसाधारणमभ्रमनिहंतृत्वं साधनमुक्तमुपसंहरति ॥ देहीति सर्वस्य प्राणिजातस्य देहे वध्य-
मानेऽप्ययं देही लिंगोपाधिरात्मा वध्यो न भवतीति नित्यं नियतं यस्मात्तस्मात्सर्वाणि भूतानि स्थूलानि
सूक्ष्माणि च भीष्मादिभावापन्नान्युद्दिश्य त्वं न शोचितुमर्हसि ॥ स्थूलदेहस्याशोच्यत्वमपरिहार्य-
त्वात् ॥ लिंगदेहस्याशोच्यत्वमात्मवदेवाव्ययत्वादिति न स्थूलदेहस्य लिंगदेहस्यात्मनो वाशोच्यत्वं
युक्तमिति भावः ॥ ३० ॥ तदेवं स्थूलसूक्ष्मशरीरद्वयतत्कारणाविद्याख्योपाधित्रयाविवेकेन मिथ्याभू-
तस्यापि संसारस्य सत्यत्वात्मधर्मत्वादिप्रतिभासरूपं सर्वप्राणिसाधारणमज्ञानसंभ्रमं निराकर्तुं
मुपाधित्रयविवेकेनात्मस्वरूपमभिहितवान् ॥ संप्रति युद्धाख्ये स्वधर्मे हिंसादिबाहुल्येनाधर्म-

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ॥ तस्मात्सर्वाणि भूतानि न त्वं शोचितु-
मर्हसि ॥ ३० ॥ स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ॥

त्वप्रतिभासरूपमज्ञानं द्वितीयमवकरणादिदोषनिबंधनमसाधारणं भ्रमं निराकर्तुं हिंसादिमत्त्वेऽपि युद्ध-
स्य स्वधर्मत्वेनाधर्मत्वाभावं बोधयति भगवान् ॥ स्वधर्ममिति न केवलं परमार्थतत्त्वमवेक्ष्य किंतु स्व-
धर्ममपि त्वं स्वीयधर्ममपि ॥ युद्धापराङ्मुखत्वरूपमवेक्ष्य शास्त्रतः पर्यालोच्य विकंपितुं विचलितुं
धर्मादधर्मत्वभ्रान्त्या निवर्तितुं नार्हसि ॥ तच्चैवं सति यद्यप्येतेन पशुं पतीत्यादिना नरके नियतं वासो
भवतीत्येतेन युद्धस्य पापहेतुत्वं त्वया यदुक्तं ॥ कथं भीष्ममहं संख्ये इत्यादिना च गुरुवधब्रह्म-
वधाद्यकरणं यदभिहितं तत्सर्वं धर्मशास्त्रापर्यालोचनादे ॥

वोक्तं ॥ कस्माद्धि यस्माद्धर्म्यात् ॥ अथ वा ऽस्मत्त्वत्वधर्मादनपेतात् युद्धादन्यत् क्षत्रियस्य श्रेयः श्रे
यःसाधनं न विद्यते ॥ युद्धमेव हि पृथिवीजयद्वारेण प्रजारक्षणब्राह्मणशुश्रूषादिक्षात्त्रध
र्मनिर्वाहकमिति तदेव क्षत्रियस्य प्रशस्ततरमित्यभिप्रायः ॥ तथा चोक्तं पराशरेण ॥ क्षत्रि
यो हि प्रजा रक्षन् शस्त्रपाणिः प्रदंडवान् ॥ निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेदि
ति ॥ मनुनापि ॥ समोत्तमाधमै राजा त्वाहूतः पालयन् प्रजाः ॥ न निवर्त्तेत संग्रामात्क्षात्त्रंध
र्ममनुस्मरन् ॥ संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनं ॥ शुश्रूषा ब्राह्मणानां च राज्ञः श्रेय

धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥

राजा राजसाधारणः =

स्वके व परमित्यादि ॥ राजशब्दश्च क्षत्रियजातिमात्रवाचीति स्थितमेवेत्यधिकरणे तेन न भूमिपाल
स्यैवायं धर्म इति भ्रमितव्यं ॥ उदाहृतवचनेऽपि क्षत्त्रियो हीति क्षात्त्रं धर्ममिति च स्पष्टं लिंगं ॥ त
स्मात्क्षत्रियस्य युद्धं प्रशस्तो धर्म इति साधु भगवताभिहितं ॥ अथ पशवो ऽन्ये गोअश्वेभ्यः पशवो
गोअश्वाश्चेतिवत् ॥ प्रशंसालक्षणाया युद्धादन्यत् श्रेयः श्रेयःसाधनं न विद्यते इत्युक्तमिति
न दोषः ॥ एतेन युद्धात् प्रशस्ततरं किंचिदनुष्ठानं न तो निष्ट्रिरुचितेति निरस्तं ॥ न च
श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे इत्येतदपि ॥ ३१ ॥ ॥

निरस्तम्

ननु युद्धस्य कर्तव्यत्वेपि न भीष्मद्रोणादिभिर्गुरुभिः सह तत्कर्तुमुचितमतिगर्हितत्वादित्याशं
क्याह । यदृच्छयेति यदृच्छया स्वप्रयत्नव्यतिरेकेण चावधारणे ॥ अप्रार्थितमेवोपस्थितं ईदृशं
भीष्मद्रोणादिवीरपुरुषप्रतियोगिकं कीर्तिराज्यलाभदृष्टफलसाधनं युद्धं ये क्षत्रियाः प्रति
योगित्वेन लभंते ते सुखिनः सुखभाज एव ॥ जये सत्यनायासेनैव यशसो राज्यस्य च लाभात् ।
पराजये चातिशीघ्रमेव स्वर्गस्य लाभादित्याह ॥ स्वर्गद्वारमपावृतमिति अप्रतिबंधं स्वर्गसाध
नं युद्धमव्यवधानेनैव स्वर्गजनकं ॥ ज्योतिष्टोमादिकं तु चिरतरेण देहपातस्य प्रतिबंधाभाव
स्य चापहरणादित्यर्थः ॥ स्वर्गद्वारमित्यनेन श्येनादिवत्प्रत्यवायशंकापास्ता ॥ श्येनादयो हि

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं ॥

श्येनस्य विधिस्पृष्टत्वेन तत्फलस्य शत्रुवधरूपाभिचारस्यापि विधिस्पृष्टत्वात्

अभिचारे शत्रुवधे =

विहिता अपि फलदोषेण दुष्टाः तत्फलस्य शत्रुवधस्य न हिंस्यात्सर्वा भूतानि ब्राह्मणं न हन्यादित्या
दिशास्त्रनिषिद्धस्य प्रत्यवायजनकत्वात् ॥ फले विध्यभावाच्च न विधिस्पृष्टे निषेधानवकाश इति न्याया
वतारः ॥ युद्धस्य फलं स्वर्गः स च न निषिद्धः ॥ तथा च मनुः ॥ आहवेषु मिथोन्योन्यं जिघांसंतो मही
क्षितः ॥ युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः इति ॥ युद्धं त्वग्नीषोमीयालंभवद्विहितत्वान्न
निषेधेन स्प्रष्टुं शक्यते षोडशिग्रहणादिवत् ग्रहणाग्रहणयोस्तु तुल्यबलतया विकल्पेन सामान्य
शास्त्रस्य विशेषशास्त्रेणासंकोचसंभवात् ॥ तथा च विधिस्पृष्टे निषेधानवकाश इति न्यायान्न युद्धेन

अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति =

अत्र तु न हिंस्यात् इति =

यथा षोडशिग्रहणं विधिना निषेधेन च स्प्रष्टुं शक्यते न तथा युद्धं निषेधेन स्प्रष्टुं शक्यते तत्र इति व्यतिरेकदृष्टान्तः = २

अग्नीषोमीयपशुआलंभेनेति = २ नत्वहेतुमाह = २ सामान्यविशेषभावाभावात् = २

प्रथमपादौ नोत्तरमोले स्वयं यथावेदितमर्थिना लखासामं बदङ्क्तीतनीमज्ञातादि विशिष्टतं अनार्थीस्थात तंत्रं विस्तं पूर्वीवेदकसंनिधौ
तनोर्थीलेख्य पत्र यः प्रतिज्ञानार्थसाधनम तस्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा चतुष्पाद्व्यवहारोऽयं विवादे षूपदर्शितः = ३

गी॰टी॰
म॰ द्वि॰
५२

वधजनकं ॥ नापि भीष्मद्रोणादिगुरुब्राह्मणादिवधनिमित्तो दोषः तेषामाततायित्वात् ॥ तदुक्तं मनुना गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं ॥ आततायिनमायान्तं हन्यादेवाविचारयन् ॥ आततायिनमायान्तमपि वेदान्तगं रणे ॥ जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ नाततायिवधे दोषो हन्तुर्भवति कश्चनेत्यादि ॥ ननु ॥ स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः ॥ अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिरिति याज्ञवल्क्यवचनात् ॥ आततायिब्राह्मणवधेऽपि प्रत्यवायो भवत्येव ॥ ब्राह्मणं न हन्यादिति हि दृष्टप्रयोजनानपेक्षत्वात् धर्मशास्त्रं जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेदिति च स्वजीवनार्थत्वादर्थशास्त्रं ॥ अत्रोच्यते ॥ ब्रह्मणे ब्राह्मणमालभेते

सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशं ॥ ॥

त्यादिवत् युद्धविधायकमपि धर्मशास्त्रमेव ॥ सुखदुःखे समे कृत्वेत्यत्र दृष्टप्रयोजनानपेक्षत्वस्य दर्शितत्वात् ॥ याज्ञवल्क्यवचने तु दृष्टप्रयोजनोद्देशक कूटायुधादिकृतवधविषयमित्यदोषः ॥ मिताक्षराकारस्तु ॥ धर्मार्थसन्निपातेऽर्थग्राहिण एतदेवेति द्वादशवार्षिकप्रायश्चित्तमेतत् कृत्वा परामृष्टस्यापहृत्वेन विधानान्निर्बलत्वादर्थशास्त्रान्नसारेण चतुष्पाद्व्यवहारे शास्त्रेऽपि जयेऽपि धर्मशास्त्रातिक्रमो न कर्तव्य इत्येतत्परं वचनमित्याह ॥ भवत्वेवं न नो हानिः ॥ तदेवं युद्धकरणे स्वर्गलोकेः स्वजनं हि कथं हत्वा सुखिनः स्याम माधवेत्यर्जुनोक्तमपाकृतं ३२

का
याज्ञवल्क्यस्मृति टीकाकारैः
आपस्तम्ब स्मृति
णा = ३
२ स्यादित्येना
वयः = ८
वादिनो येवादिना
निवेदितस्यार्थस्य संवत्सरादिविशिष्टेन लेखनं भाषा प्रतिज्ञा २ एकः पादः यथा सुवर्णशतं मेधारय नीति प्रतिज्ञार्थो नास्ति धारयामीत्युल्लेखनं द्वितीयः पादः ततः प्रतिज्ञार्थसाधनं पुनः प्रत्यर्थी लेखयेत्

प्रतिज्ञोत्तरसाधन सिद्धयश्चत्वारः पादा यस्य व्यवहारस्य तस्मिन् = ३

लिखितं साक्षी च प्रमाणं त्रितयं इति तृतीयः पादः ततो वा द्युक्तस्य लिखितं
सिद्धिप्राप्तिः स्यात् सिद्धिश्चतुर्थः पादः = ३
णा

नकूटैरायुधैः कूटानिवद्धिः काष्ठादिनाच्छन्नानि कर्णिनः कर्णाकारफलका बाणाः दिग्धानि विषाक्तानि अग्निज्वलिततेजनानि
अग्निप्रदीप्तफलकानि स्थलारूढस्थः स्थलारूढं नहन्यात् विसन्नाहं मुक्तसन्नाहं परेणसमागतं युध्यमानं आयुधव्यसनप्राप्तं
लग्नखड्गाद्यायुधं पुत्रशोकादिभिरार्तं शरप्रतिपरिक्षतं बहुप्रकाराहतमिति =२

ननुनाहंयुद्धफलकामः नकांक्षेविजयंकृष्णअपित्रैलोक्यराज्यस्येत्युक्तत्वात्तत्कथंमयाकर्तव्यमित्या
शंक्याकरणेदोषमाह ॥ अथेतिपद्यांतरे ॥ इमंभीष्मद्रोणादिवीरपुरुषप्रतियोगिकंधर्म्यंहिंसा
दिदोषरागाद्युष्टंसतांधर्मादनपेतमितिवासंचमनुनादर्शितः ॥ नकूटैरायुधैर्हन्याद्युध्यमानोरणे
रिपून् ॥ नकर्णिभिर्नापिदिग्धैर्नाग्निज्वलिततेजनैः ॥१ नचहन्यात्स्थलारूढंनक्लीबंनकृतांज
लिं ॥ नमुक्तकेशंनासीनंनतवास्मीतिवादिनं ॥१ नसुप्तंनविसन्नाहंननग्नंननिरायुधं ॥ नायु

अथचेत्त्वमिमंधर्म्यं ॥ संग्रामंनकरिष्यसि ॥

ध्यमानंपश्यंतंनपरेणसमागतं ॥ नायुधव्यसनप्राप्तंनार्तंनातिपरिक्षतं ॥ नभीतंनपराववृत्तंसतां
धर्ममनुस्मरन्निति ॥४ सतांधर्ममनुल्लंघ्ययुध्यमानोहिपापीयान्स्यात् ॥ त्वंतुपरैराहूतोपिसद्धर्मो
पेतमपिसंग्रामंयुद्धंनकरिष्यसि ॥ धर्मतोलोकतोवाभीतःपराङ्मुखोभविष्यसिचेत् ॥ ततोनि
र्जित्यपरसैन्यानिक्षितिंधर्मेणपालयेदित्यादिशास्त्रविहितस्यपुरुषस्याकरणा ॥ ॥ श्रीरामजी

तत्स्वधर्मं हित्वा ऽ ननुश्वायकीर्तिं च महादेवादिसमागमनिमित्तां हित्वा न निवर्तेत संग्रामादि।
त्यादिशास्त्रनिषिद्धं संग्राममनिहत्या वीरराजन्यं पापमेव केवलमवाप्स्यसि ॥ न तु धर्मकीर्ति
वाइत्यभिप्रायः ॥ अथवा ऽ नेकजन्मार्जितं धर्मं त्यक्त्वा राजहृतं पापमवाप्स्यसीत्यर्थः ॥ य
स्मात्त्वां पराहतमेते दुष्टाश्च वधं प्रहनिष्यंति अतः पराहतहतः सन् चिरोपार्जितनिजस्वकृ
तपरित्यागेन परोपार्जितदुष्कृतमात्राभाग्भूरित्यभिप्रायः ॥ तथा च मनुः ॥ यस्तु भी

ततः स्वधर्मं कीर्तिं च ॥ हित्वा पापमवाप्स्यसि
॥३३॥

तः पराहतः संग्रामे हन्यते परैः ॥ भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ॥ यच्चास्य सुकृतं।
किंचिदमुत्रार्थमुपार्जितं ॥ भर्ता तत्सर्वमादत्ते पराहतहतस्य त्विति ॥ याज्ञवल्क्योपि ॥ रा
जा सुकृतमादत्ते हतानां विपलायिनामिति ॥ तेन यदुक्तं पापमेवाश्रयेदस्मान् हत्वैतानातत
तायिनः ॥ एतान्न हंतुमिच्छामि घ्नतोपि मधुसूदनेति तन्निराकृतं भवति ॥३३॥ रामजी

एवं कीर्तिधर्मयोरिष्टयोरप्राप्तिरनिष्टस्य च पापस्य प्राप्तिर्युद्धपरित्यागे दर्शिता ॥ तत्र पापाख्यमनिष्टं
व्यवधानेन दुःखफलदमामुष्मिकत्वात् ॥ शिष्टगर्हालक्षणं त्वनिष्टमासन्नफलदमत्यसह्यमित्या
ह ॥ अकीर्तिमिति भूतानि देवर्षिमनुष्यादीनि ते तव अव्ययां दीर्घकालामकीर्तिं न धर्मात्मा न शूरोऽय
मित्येवंरूपां कथयिष्यन्ति अन्योन्यं कथाप्रसंगे कीर्तिधर्मनाशसमुच्चयार्थौ निपातौ ॥ न केवलं की
र्तिधर्मौ हित्वा पापं प्राप्स्यसि अपि तु अकीर्तिं च प्राप्स्यसि ॥ न केवलं त्वमेव तां प्राप्स्यसि अपि तु भूतान्य
पि कथयिष्यन्तीति वा निपातयोरर्थः ॥ ननु युद्धे स्वमरणसंदेहात्तत्परिहाराय अकीर्तिरपि सोढव्या
आत्मरक्षणस्यात्यंतापेक्षितत्वात् ॥ तथा चोक्तं शांतिपर्वणि ॥ साम्ना दानेन भेदेन समस्तैरुत वा पृ

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययां ॥ संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४

थक् ॥ विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥ अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः ॥ पराजय
श्च संग्रामे तस्माद्युद्धं विवर्जयेत् ॥ त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे ॥ तथा युद्धेत संपन्नो वि
जयेत रिपून्यथेति एवमेव मनुनाप्युक्तं ॥ तथा च ॥ मरणाभीतस्य किमकीर्तिदुःखमिति शंका
मपनुदति ॥ संभावितस्य धर्मात्मा शूर इत्येवमादिभिरनन्यलभ्यैर्गुणैर्बहुमतस्य जनस्याकीर्तिर्मरणा
दप्यतिरिच्यते अधिका भवति चो हेतौ ॥ एवं यस्मात् अतोऽकीर्तेर्मरणमेव वरं न्यूनत्वात् ॥ त्वमप्यति
संभावितोऽसि महादेवादिसमागमेन अतो नाकीर्तिदुःखं सोढुं शक्ष्यसीत्यभिप्रायः ॥ उदाहृतवचनं
तु अर्थशास्त्रत्वान्न निवर्त्तकं संग्रामादित्यादि धर्मशास्त्राद्दुर्बलमिति भावः ॥ ३४ ॥ श्रीरामजी सहा

चापीति निपातौ

ननुउदासीनाजनामांनिंदंतुनामभीष्मद्रोणादयस्तुमहारथाःकारुणिकत्वेनश्लाघ्यंतिमामि
त्यतआह॥भयादितिकर्णादिभ्योभयात्युद्धान्निवृत्तंनकृपयेतित्वांमंस्यन्तेभीष्मद्रोणादु
र्योधनादयोमहारथाः॥ननुतेमांबहुमन्यमानाःकथंभीतंमंस्यंतइत्यतआह॥येषामेवा
भीष्मादीनांत्वंबहुमतोबहुभिर्गुणैर्युक्तोऽयमर्जुनइत्येवंमतस्तएवत्वांमहारथाभयादु
परतंमंस्यंतइत्यन्वयः।अतोभूत्वायुद्धादुपरतइतिशेषः॥लाघवमनादरविषयत्वंया।

भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः॥येषांचत्वंबहुमतोभूत्वाया
स्यसिलाघवं॥३५॥अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः॥

स्यसिप्राप्स्यसितेषामितिशेषः॥येषामेवत्वंप्राक्बहुमतोऽभूःतेषामेवतादृशोभूत्वाला
घवंयास्यसीतिवा॥३५॥ननुभीष्मादयोमहारथानबहुमंस्यन्ते॥दुर्योधनादयस्तुशत्र।
वोबहुमंस्यंतेमांयुद्धनिवृत्त्यानदुपकारित्वादित्यतआह॥अवाच्यवादानितितवासाधार।
णंयत्सामर्थ्यंलोकप्रसिद्धंतन्निंदंतस्तवशत्रवोदुर्योधनादयःअवाच्यान्वादान्वचनानर्हान्
षंढतिलादिरूपानेवशब्दान्बहून्अनेकप्रकारान्वदिष्यंति॥ननुबहुमंस्यन्तइत्यभिप्रा

निर्मोलतिलाः

यः ॥ अथ वा तव सामर्थ्यं स्तुतियोग्यं त्वं तव निंदंतो ऽहिता अवाच्यवादान्वदिष्यंतीत्यन्वयः ॥ नन्व
भीष्मद्रोणादिवधप्रयुक्तं कष्टतरं दुःखमसहमानो युद्धान्निवृत्तः शत्रुकृतं सामर्थ्यनिंदना
दिदुःखं सोढुं शक्ष्यामीत्यत आह ॥ ततस्तस्मान्निंदाप्राप्तिदुःखात् किं नु दुःखतरं नतोधि
कं किमपि दुःखं नास्तीत्यर्थः ॥३६॥ ननु तर्हि युद्धे गुर्वादिवधवशान्मध्यस्थकृता निंदा न
तो निवृत्तौ तु शत्रुकृता निंदेत्युभयतः पाशारज्जुरित्याशंक्य जये पराजये च लाभ एवेत्याह यु

निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं ॥३६॥ हतो वा प्रा
प्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं ॥ तस्मादुत्तिष्ठ कौन्तेय ।
युद्धाय कृतनिश्चयः ॥३७॥

द्धमेवोत्थानमावश्यकमित्याह ॥ हतो वेति स्पष्टो ऽर्थः । यस्मादुभयथापि ते लाभः ॥ तस्मात्
जेष्यामि शत्रून्मरिष्यामि वेति कृतनिश्चयः सन् युद्धायोत्तिष्ठ ॥ अन्यतरफलसंदेहे ऽपि युद्ध
कर्तव्यताया निश्चितत्वात् ॥ एतेन न चैतद्विद्मः कतरन्नो गरीय इत्यादि परिहृतं ॥ ॥३७॥

गी॰टी॰
म॰द्वि॰
५५

युद्धं काम्यत्वात्

नन्वेवं स्वर्गमनुद्दिश्य युद्धं करोति तस्य नित्यत्वं व्याघातः ॥ राज्यमनुद्दिश्य युद्धं करोति तर्थि शास्त्रत्वा
द्धर्मशास्त्रापेक्षया दोषं विकल्पः स्यात् ॥ ततश्च काम्यस्याकरणे कुतः ॥ पापं दृष्टार्थस्य गुरुब्राह्म
णादिवधस्य कुतो धर्मत्वं ॥ तथा च अथ चेदिति श्लोकार्थो व्याहत इति चेत् ॥ तत्राह ॥ सुख
दुःखे इति समतां कृत्वा रागद्वेषवर्जितं सुखे तत्कारणे लाभे तत्कारणे जये च रागमकृ
त्वा । एवं दुःखे तद्धेतावलाभे तद्धेतावजये च द्वेषमकृत्वा ॥ ततो युद्धाय युज्यस्व सन्नद्धो भव ए
वं सुखकामनो दुःखनिवृत्तिकामनो वा विहाय स्वधर्मबुद्ध्या युध्यमानो गुरुब्राह्मणादिवध

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ॥ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

निमित्तं नित्यकर्माकरणनिमित्तं च पापं न प्राप्नोषि ॥ यस्तु फलकामनया करोति स गुरुब्राह्म
णादिवधनिमित्तं पापं प्राप्नोति ॥ यो वा न करोति स नित्यकर्माकरणनिमित्तं ॥ अतः फलकाम
नामंतरेण ऊर्ध्वन्तु भयविषयमपि पापं न प्राप्नोतीति प्रागेव व्याख्यातोऽभिप्रायः ॥ हतो वा प्राप्स्य
सि स्वर्गं जित्वा वा भोक्ष्यसे महीमिति त्वानुषंगिकफलकथनमिति न दोषः ॥ तथा चापस्तंबः स्म
रति ॥ तद्यथाम्रे फलार्थे निमित्ते छाया गंध इत्यनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्य
न्ते नो चेदनूत्पद्यन्ते न धर्महानिर्भवतीति ॥ अतो युद्धशास्त्रं धर्मशास्त्रत्वाभावात्पापमेवाश्रये

भूमिरवननंकृत्वा स्थापिते सति = अनुपश्चादुत्पद्येते आकामिते अपि = २ धर्मस्य मुख्यफलमन्तःकरणशुद्धिरेव यथाम्रस्य
फलानि अर्थः कामश्च छायादिवदमुख्यफलं तेनानन्तरं धर्मैर्धर्मफलस्य मुख्यकरूपानानित्यफलस्यापि न ज्ञातं = २

५५

ननु भवतु स्वधर्मबुद्ध्या युध्यमानस्य पापाभावः ॥ तथापि न मां प्रति युद्धकर्तव्यतोपदेशस्तवोचितः ॥ यत
नैवेति हन्तारम् इत्यादिना ॥ कथं स पुरुषः पार्थ कं घातयति हन्ति कम् इत्यन्तेन विदुषः सर्वकर्मप्रतिषे-
धात् ॥ न ह्यकर्त्रभोक्तृशुद्धरूपोऽहमस्मि युद्धं कृत्वा तत्फलं भोक्ष्ये इति च ज्ञाने संभवति विरोधात् ॥ ज्ञा
नकर्मणोः समुच्चयाभावात् ॥ प्रकाशतमसोरिव अयं चार्जुनाभिप्रायः ज्यायसी चेदित्यत्र व्यक्तो भ
विष्यति ॥ तस्मादेकमेव मां प्रति ज्ञानस्य कर्मणश्चोपदेशो नोपपद्यते इति चेत् ॥ विरुद्धाविरुद्धस्या
भेदेन ज्ञानकर्मोपदेशोपपन्न इत्याह भगवान् ॥ एषेत्यादिना एषा नत्वेवाहमित्याद्यैरेकोनविं
शतिश्लोकैः ते तुभ्यम् अभिहिता सांख्ये सम्यक् ख्यायते सर्वोपाधिशून्यतया प्रतिपाद्यते परमात्म

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु । बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ३९ ॥

तत्त्वमनयेति संख्या उपनिषत् तस्यामेव तात्पर्यपर्यवसानात् तया प्रतिपाद्यते यः स सांख्यः औपनिषदः पुरुष
इत्यर्थः तस्मिन् बुद्धिः तन्मात्रविषयं ज्ञानं सर्वानर्थनिवृत्तिकारणं त्वां प्रति मयोक्तं ॥ नैतादृशज्ञा
नवतः क्वचिदपि कर्मोच्यते ॥ तस्य कार्यं न विद्यत इति वक्ष्यमाणत्वात् ॥ यदि पुनरेवं मयोक्तेऽपि
तवैषा बुद्धिर्नोदेति चित्तदोषात् ॥ तदा तदपनयेनात्मतत्त्वसाक्षात्कारकारणं कर्मयोग एव त्वया
नुष्ठेयः ॥ तस्मिन् योगे कर्मयोगे तु करणीयाम् इमां सुखदुःखे समे कृत्वेत्यत्रोक्तां फलाभिसंधित्या
गलक्षणां बुद्धिं विस्तरेण मया वक्ष्यमाणां शृणु ॥ तु शब्दः पूर्वबुद्धेर्योगविषयत्वव्यतिरेकसूचना

देशोऽशुद्धान्तःकरणं प्रति कर्मोपदेश इति ज्ञानतः सम्यक्त्वयशंकयाविवेचावकाश इत्यभिप्रायः ॥ योग
विषयां तु बुद्धिं फलकथनेनस्तौति ॥ यया व्यवसायात्मिकया बुद्ध्या कर्मसु युक्तस्त्वं कर्मनिमित्तं बंधमा
शयाशुद्धिलक्षणं ज्ञानप्रतिबंधं प्रकर्षेण पुनःप्रतिबंधानर्हत्वेन हास्यसि त्यक्ष्यसि ॥ अयं
भावः कर्मनिमित्तो ज्ञानप्रतिबंधः कर्मणैव धर्माख्येनापनेतुं शक्यते ॥ धर्मेण पापमपनुदतीति
श्रुतेः ॥ श्रवणादिलक्षणो विचारस्तु कर्मात्मकप्रतिबंधरहितस्यासंभावनादिप्रतिबंधं दृष्ट
द्वारेणापनयतीति न कर्मप्रतिबंधनिराकरणायोपदेष्टुं शक्यते ॥ अतोऽत्यंतमलिनांतःकर

बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि । ३९ ॥

णत्वाद्बहिरंगसाधनं कर्मैव त्वयानुष्ठेयं ॥ नाधुना श्रवणादियोग्यतापि तव जाता दूरे तु ज्ञानयोग्य
तेति ॥ तथा च वक्ष्यति ॥ कर्मण्येवाधिकारस्त इति ॥ एतेन सांख्यबुद्धेरंतरंगसाधनं श्रवणादिवि
हाय बहिरंगसाधनं कर्मैव भगवता किमित्यर्जुनायोपदिश्यत इति निरस्तं कर्मबंधं संसारमीश्वरा ३९
प्रसादनिमित्तज्ञानप्राप्त्या प्रहास्यसीति प्राचां व्याख्याने तत्वध्याहारदोषः कर्मपदवैयर्थ्यं च परिहर्तव्य मू

श्रीधरा दीपि नाम

एकस्य तूभयत्वे संयोगपृथक्त्वमिति पूर्वमीमांसासूत्रम्। वैल्वो वा खादिरो वा पालाशो वा यूपो भवतीत्यत्र तया क्रतौ केनित्यः संयोगेनैव क्रत्वर्थं खादिरत्वस्य भवति खादिरं वीर्यकामस्येत्यत्र पुरुषार्थं खादिरत्वस्य... खादिरत्वस्योभयार्थत्वे संयोगपृथक्त्वं हेतुर्भवतीति सूत्रार्थः अयमेव न्यायस्तत्र प्रकृतयोराश्रमकर्मणां नित्यत्व... विविदिषार्थत्वे

नन्वतमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति श्रुत्या विविदिषांग त्वेनाविदिशपसंयोगपृथक्त्वन्यायेन सर्वकर्मणां विनियोगात्॥ तत्र चांतःकरणशुद्धेर्द्वारत्वात्माप्र तिकर्मानुष्ठाने विधीयते तत्र च न यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुतिबोधितस्य फलनाशस्य संभवात्॥ ज्ञाने विविदिषाद्वारे शुद्धिक्रियमाणस्य यज्ञा देः काम्यत्वात्॥ सर्वांगोपसंहारेणानुष्ठेयस्य यत्किंचिदंगासंपन्नावपि वैगुण्यापत्तेः॥ यच्चे त्यादिवाक्यविहितानां च सर्वेषां कर्मणामेकेन पुरुषायुषपर्यवसानेपि कर्तुमशक्यत्वात् कुतः कर्मवैयर्थ्यप्रहासस्य सीति फलेऽप्रत्याशेत्यत आह भगवान्॥ नेहेति॥ अभिक्रम्यते कर्मणा प्रा

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ४०॥

न यथेह कर्मजितो लोक इत्यत्र=२

रभ्यते यत्फलं सोऽभिक्रमस्तस्य नाशः॥ न यथेहेत्यादिना प्रतिपादितः॥ इह निष्कामकर्मयोगे ना स्ति॥ एतत्फलस्य शुद्धेः पापक्षयरूपत्वेन लोकशब्दवाच्यभोग्यत्वाभावेन तत्क्षयासंभवात्॥ वे दनपर्यंतायाश्च विविदिषायाः कर्मफलत्वाच्छुद्धेर्वेदनस्य चाव्यवधानेनाज्ञाननिवृत्तिफलजनक स्य फलमजनयित्वा नाशासंभवादिह फलनाशो नास्तीति साधूक्तं॥ तदुक्तं॥ न यथेहेति या निंदा सा फलेन न तु कर्मणा॥ फलेच्छां तु परित्यज्य कृतं कर्म विशुद्धिकृदिति॥ तथा प्रत्यवायः॥ अंगवैगुण्य निबंधनं वैगुण्यमिह न विद्यते॥ तमेतमितिवाक्येन नित्यानामेवोपात्तदुरितक्षयद्वारेण विविदिषा नां

लोकप्रसिद्ध... ज्ञानार्थत्वमिति... नित्यानां कर्मणामेवोपलक्षणमित्येकः पक्षः काम्यानामपु पलक्षणमित्यपरः पक्षः इति वार्त्तिके स्पष्टम् = अन्तःकरणशुद्धिद्वारा =

फलाभिसंधिरहि तानां नित्यानां काम्यानां...

कर्मणां नित्यत्वे काम्यत्वे वा विविदिषाप्रकृत योजनी यम्=२

वार्त्तिके

सर्वांगोपसंहारनियमाभावात् ॥ काम्यानामपि संयोगपृथक्त्वन्यायेन विनियोग इति पक्षेपि फलाभि।
संधिरहितत्वेन तेषां नित्यतुल्यत्वात् ॥ नहि काम्यनित्याग्निहोत्रयोः स्वतः कश्चिद्विशेषोस्ति फलाभि
संधितदभावाभ्यामेव तु काम्यत्वनित्यत्वव्यपदेशः ॥ इदं च पक्षद्वयमक्तं वार्तिके ॥ वेदानुवचना।
दीनामैकात्म्यज्ञानजन्मने ॥ तमेतमिति वाक्येन नित्यानां वक्ष्यते विधिः ॥ यद्वा विविदिषार्थत्वं का
म्यानामपि कर्मणां ॥ तमेतमिति वाक्येन संयोगस्य पृथक्त्वतः इति ॥ तथा च फलाभिसंधिना क्रिय
माणानां पवकर्मणां सर्वांगोपसंहारनियमान्नहि लघुरोपि सुद्धार्थे कर्मणि प्रतिनिध्यादिना समाप्ति
किंचिदंगवैगुण्येपनाल्पेनापि कृतेन

स्वल्पमप्यस्य धर्मस्य ॥ त्रायते महतो भयात् ५० ॥

संभवान्नांगवैगुण्यनिमित्तः प्रत्यवायोस्तीत्यर्थः ॥ तथा स्वल्पमप्यस्य धर्मस्य तमेतमित्यादिवाक्य
विहितस्य मध्ये स्वल्पमपि संख्येयेति कर्तव्यतया वा ॥ यथाशक्ति भगवदाराधनार्थं किंचिदप्य
नुष्ठितं सत् महतः संसारभयात्त्रायते ॥ भगवत्प्रसादसंपादनेनानष्ठातारं रक्षति ॥ सर्वपापप्रस
क्तोपि ध्यायन्निमिषमच्युतं ॥ भूयस्तपस्वी भवति पंक्तिपावनपावन इति स्मृतेः ॥ तमेतमिति वाक्ये
न ज्ञयविधायकाभावाच्च श्रुतिनारतम्यादेवानुष्ठाननारतम्योपपत्तेर्युक्तमक्तं कर्मवं धप्रहाणः
यज्ञदानतपसां समुच्चय=
न सर्वेषामेव यज्ञादीनामवश्यकर्तव्यता=

नुःक्तिकर्मणां वानप्रस्थकर्मणां संन्यासिकर्मणां यज्ञेन दानेन तपसा नाशकेन निष्कामत्वप्रधाना रिकर्म यज्ञादि निरपेक्षं मोक्षसाधनम् तथा यज्ञ दानादिकमपीतरनिरपेक्षं मोक्षसाधनम् =२

चतुर्णामाश्रमकर्मणां परस्परसापेक्षाणामेकार्थत्वेन तु समुच्चयः स्यात् =४ समुच्चयबोधको द्वन्द्वसमासश्चकारश्चात्र न भवति =५ वेदानुवचनेनेत्यादि वाक्ये =५ वाक्ये यथा समुच्चयो बोध्यते =५

एतदुपपादनाय तमेतमितिवाक्यविहितानामेकार्थत्वमाह । व्यवसायेति हे कुरुनंदन इह श्रेयो ।
मार्गे तमेतमितिवाक्ये वा व्यवसायात्मिका आत्मतत्त्वनिश्चयात्मिका बुद्धिरेकैव चतुर्णामाश्र
माणां साध्या विविदिषावेदानुवचनेनेत्यादौ तृतीयाविभक्त्या प्रत्येकं निरपेक्षसाधनत्वबो
धनात् ॥ अभिन्नार्थत्वेन समुच्चयः स्यात् ॥ एकार्थत्वेपि दर्शपूर्णमासाभ्यामितिवत् द्वंद्वस
मासेन यदग्नये च प्रजापतये चेतिवत् चशब्देन न तथात्र किंचित्प्रमाणमस्तीत्यर्थः ॥ साध्य
विषयायोगविषया च बुद्धिरेकफलत्वादेका व्यवसायात्मिका सर्वविपरीतबुद्धीनां बाधि

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन । बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ॥४१॥

श्रीधरादयः=२

का निर्दोषवेदवाक्यसमुत्थत्वादितरास्त्वव्यवसायिनां बुद्धयो बाध्या इत्यर्थ इति भाष्यकृतः ।
अन्ये तु परमेश्वराराधनेनैव संसारं तरिष्यामीति निश्चयात्मिका एकनिष्ठैव बुद्धिरिह कर्मयो
गे भवतीत्यर्थमाहुः ॥ सर्वथापि तु ज्ञानकांडानुसारेण स्वल्पमप्यस्य धर्मस्य त्रायते महतो
भयादित्युपपन्नं ॥ कर्मकांडे पुनः बहुशाखा अनेकभेदत्वात् ॥ अनंताश्च कर्मफलगुणा
फलादिप्रकारोपशाखाभेदात् ॥ बुद्धयो भवंत्यव्यवसायिनां तत्तत्फलकामानां ॥ बुद्धीनामा
नंत्यप्रसिद्धिद्योतनार्थो हिशब्दः ॥ अतः काम्यकर्मापेक्षया महद्वैलक्षण्यं शुद्ध्यर्थकर्मणामि

परस्परनिरपेक्षाणां चतुराश्रमकर्मणाम् =२

श्रुतिवाक्ये यथा द्वन्द्वसमासेन समुच्चयो बोध्यते =३

श्रुत्यर्थः

...कामानामनेकभे =३ मुख्यगौणफलादि =३

प्र

अव्यवसायिनामपि व्यवसायात्मिका बुद्धिः कुतो न भवति अभ्यासस्य तुल्यत्वादित्याशंक्य प्रतिबंधकसद्भावान्न भवतीत्याह यामिति त्रिभिः ॥ यामिमां वाचं वदंतीति यावाचापहृतचेतसामविपश्चितां व्यवसायात्मिका बुद्धिर्न भवतीत्यन्वयः ॥ इमामध्ययनविधुयाज्ञत्वेन प्रसिद्धां पुष्पितां पुष्पितपलाशवदापातरमणीयां साध्य नसंबंधप्रतिभानान्निरतिशयफलाभावाच्च ॥ कुतो निरतिशयफलाभावस्तदाह ॥ जन्मकर्मफलप्रदाम् जन्म चापूर्वशरीरेंद्रियादिसंबंधलक्षणं तदधीनं च कर्म तत्तद्वर्णाश्रमाभिमाननिमित्तं तदधीनं च फलं पुत्रपशुस्वर्गादिलक्षणं विनश्वरं ॥ तानि प्रकर्षेण घटीयंत्रवद विच्छेदेन ददातीति तथा तां कुत एवमत आह ॥ भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलां अन्नपानोर्वशीविहारपारिजातपरिमलादिनिबंधनो यो भोगः ॥ तत्कारणं च यदैश्वर्यं देवादिस्वामित्वं तयोर्गतिं प्राप्तिं प्रति साधनभूता ये क्रियाविशेषास्त

यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ॥ वेदवादरताः पार्थ नान्यदस्तीति वादिनः ४२ ॥

प्रतिपा

ग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादयः तैर्बहुलां विस्तृतां अतिबाहुल्येन भोगैश्वर्यसाधनक्रियाकलापप्रदिकामिति यावत् ॥ कर्मकांडस्य हि ज्ञानकांडापेक्षया सर्वथातिविस्तृतत्वं प्रसिद्धं ॥ एतादृशीं कर्मकांडलक्षणां वाचं प्रवदंति प्रकृष्टां परमार्थस्वर्गादिफलामभ्युपगच्छंति ॥ के ये विपश्चितः ॥ विचारजन्यतात्पर्यपरिज्ञानशून्याः अत एव वेदवादरताः वेदे ये संति वाचः अर्थवादाः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्येवमादयः तेष्वेव रता वेदार्थसत्यत्वेन ॥ एवमेवैतदिति मिथ्याविश्वासेन संतुष्टाः हे पार्थ अत एव नान्यदस्तीति वादिनः ॥ कर्मकांडापेक्षया नास्त्यन्यज्ञानकांडं सर्वस्यापि वेदस्य कार्यपरत्वात् कर्मफलापेक्षया च नास्त्यन्यन्नित्यनिरतिशयं ज्ञानफलमिति वदनशीलाः ॥ मद्बता प्रवेचे

दा

भाषिण इत्यर्थः कुतो मोहद्वेषिणस्ते । यतः कामात्मानः काम्यमानविषयशताकुलचित्तत्वेन का ममयाः एवं सति मोक्षमपि कुतो न कामयन्ते । यतः स्वर्गपराः स्वर्ग एवोर्वश्याद्युपेतत्वेन परः उत्कृष्टो येषां ते तथा स्वर्गातिरिक्तः पुरुषार्थो नास्तीति भ्रान्ताः अतो विवेकवैराग्याभावात् मोक्षकथामपि सोढुमक्षमा इति यावत् । तेषां च पूर्वोक्तयोर्भोगैश्वर्ययोः प्रसक्तानां क्षयित्वादिदोषादर्शनेन निविष्टान्तःकरणानां तया क्रियाविशेषबहुलया वाचापहृतमाच्छादितं चेतो विवेकविज्ञानं येषां तथाभूतानामर्थवादाः स्तुत्यर्थाः तात्पर्यविषये प्रमाणान्तराबाधिते वेदस्य प्रामाण्यमिति सुप्रसिद्धमपि ज्ञातुमशक्तानां समाधावन्तःकरणे व्यवसायात्मिका बुद्धिर्न विधीयते न भव

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां ॥ क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ४३ ॥

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां ॥ व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ४४

तीत्यर्थः ॥ समाधिविषया व्यवसायात्मिका बुद्धिस्तेषां न भवतीति वा । अधिकरणे विषये वा सप्तम्यास्तुल्यत्वात् विधीयते इति कर्मकर्तरि लकारः । समाधीयतेऽस्मिन्सर्वमिति व्युत्पत्त्या समाधिरन्तःकरणं वा परमात्मा वेति नाप्रसिद्धार्थकल्पनं ॥ अहं ब्रह्मेत्यवस्थानं समाधिः तन्निमित्तं व्यवसायात्मिका बुद्धिर्नोत्पद्यत इति व्याख्याने तु हठादेवाहृता अयं भावः ॥ यद्यपि काम्यान्यग्निहोत्रादीनि शुद्ध्यर्थेभ्यो न विशिष्यन्ते ॥ तथापि फलाभिसन्धिदोषान्नाशयशुद्धिं संपादयन्ति भोगानुगुणा तु शुद्धिर्मत्ता नोपयोगिनी ॥ एतदेव दर्शयितुं भोगैश्वर्यप्रसक्तानामिति पुनरुपात्तं फलाभिसन्धिमे

गी॰टी॰
म॰द्वि॰
४५

49

ननु सकामानां माभूदाशयदोषात् व्यवसायात्मिका बुद्धिः ॥ निष्कामानां तु व्यवसायात्मिकया बुद्ध्या कर्म कुर्वतां कर्मस्वाभाव्यात् स्वर्गादिफलप्राप्तौ ज्ञानप्रतिबंधः समान इत्याशंक्याह । त्रैगुण्येति त्रै । गुण्यं गुणानां कर्म त्रैगुण्यं कामममूलः संसारः स एव प्रकाश्यत्वेन विषयो येषां तादृशाः वेदाः कर्मकांडात्मकाः ॥ यो यत्फलकामः तस्यैव तत्फलं बोधयंतीत्यर्थः न हि सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति विनियोगेपि सकृदनुष्ठानात् सर्वफलप्राप्तिर्भवति तत्तत्कामनाविरहात् यत्फलकामनया तु

त्रैगुण्यविषया वेदा । निस्त्रैगुण्यो भवार्जुन । ॥

सू॰

मीमांसायाः

तिष्ठति तदेव फलं तस्मिन् प्रयोग इति स्थितं योगसिद्ध्यधिकरणे ॥ यस्मादेवं कामनाविरहे फलविरहः तस्मात्त्वं निस्त्रैगुण्यो निष्कामो भव हे ऽर्जुन ॥ एतेन कर्मस्वाभाव्यात् संसारो निरस्तः ॥ ननु शीतोष्णादिद्वंद्वप्रतीकाराय वस्त्राद्यपेक्षणात् कुतो निष्कामत्वमत आह ॥ निर्द्वंद्वः सर्वत्र भवेति सेवध्याते मात्रास्पर्शास्त्वित्युक्तन्यायेन शीतोष्णादिद्वंद्वसहिष्णुर्भव । असह्यं दुःखं कथं वा सोढव्यमित्यपेक्षाया

पूर्वमीमांसायां चतुर्थाध्याये सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति विषयवाक्यमादाय विचारः कृतः तत्र सर्वे विशेषादिति पूर्व॰
सर्वकामाः एकस्मिन् प्रयोगे स्युरविशेषात् योगसिद्धिर्वार्थस्योत्पत्तिसंयोगित्वादिति सिद्धान्तसूत्रम् एकस्मिन् प्रयोगे एकस्य फ॰
लस्य सिद्धिः बहूनामनुप्रयोगात् एकोमृ॰ राऽ एकमेव घटेजनयति नानेकं तद्वत् अनेकविषयकर्मणां योगः प्रयोगा

उत्तिमिद्ध्रुता ॥ ८

सा॰सू॰ ३ म
४५

नित्यमचलंयत्सत्वंधैर्यापरपर्यायंतस्मिंस्तिष्ठतीति॥तथारजस्तमोभ्यामभिभूतसत्वोहिशी
तोष्णादिपीडयाम्रियेमरिष्यामीतिमन्वानोधर्मात्प्रमुखोभवति॥त्वंतुरजस्तमसीअभिभूयसत्व
मात्रावलंबनोभवनन्नशीतोष्णादिसहनेपिक्लृप्तियामादिशनीकारार्थंकिंचिदनुपात्तस्योपा
देयमनुपात्तेचरक्षणीयमितितदर्थंयत्नेक्रियमाणेअतःसत्वस्थत्वमित्यतआह॥निर्योग

निर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआत्मवान्॥४५॥

क्षेमःअलब्धलाभोयोगःलब्धपरिरक्षणंक्षेमस्तैर्हितोभव॥चित्तविक्षेपकारिपरिग्रहरहि
तोभवेत्यर्थः नचैवंचिंताकर्तव्याकथमेवंसतिजीविष्यामीति॥यतःसर्वांतर्यामीपरमेश्वर
एवतवयोगक्षेमादिनिर्वाहयिष्यतीत्याह॥आत्मवान्आत्मापरमात्माध्येयत्वेनयोगक्षेमा
दिनिर्वाहकत्वेनचवर्ततेयस्यसआत्मवान्सर्वकामनापरित्यागेनपरमेश्वरमाराधयतोममस
एवदेहयात्रामात्रमपेक्षितंसंपादयिष्यतीतिनिश्चित्यनिश्चिंतोभवेत्यर्थःआत्मवानप्रमत्तोभ

गी॰ टी॰ म॰ द्वि॰ ५९

नचैवं शोचनीयं सर्वकामनापरित्यागेन कर्म कुर्वन्नहं तैस्तैः कर्मजनितैरानंदैर्वंचितः स्यामिति यस्मा
त्। उदपाने क्षुद्रजलाशये जातावेकवचनं यावानर्थः यावत्स्नानपानादिप्रयोजनं भवति। सर्वतः
संप्लुतोदके महति जलाशये तावानर्थो भवत्येव। यथा हि पर्वतनिर्झराः सर्वतः क्वचिदुपत्यकायामे
कत्र मिलंति तत्र प्रत्येकं जायमानोदकप्रयोजनं समुदिते स्फुतरां भवति। सर्वेषां निर्झराणामेकत्रै
वकासारे तदंतर्भावात्। एवं सर्वेषु वेदेषु वेदोक्तेषु काम्यकर्मसु यावानर्थः हिरण्यगर्भानंदपर्यंतः
तावान्विजानतो ब्रह्मतत्त्वं साक्षात्कृतवतो। ब्राह्मणस्य ब्रह्मनिष्ठस्य भवत्येव। क्षुद्रानंदानां ब्रह्मा

भवति अर्थो भवति यथा तथा ॥ यावानर्थो भवति तावानर्थो भवति ज्ञानिनः

यावानर्थ उदपाने सर्वतः संप्लुतोदके। तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः। ४६।

नंदांशत्वात्। तत्र क्षुद्रानंदानामंतर्भावात्। एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति
श्रुतेः। एकस्याप्यानंदस्याविद्याकल्पिततत्तदुपाधिपरिच्छेदमादायांशांशिवद्व्यपदेशः आकाश
स्येव घटाद्यवच्छेदकल्पनया। तथा च निष्कामकर्मभिः शुद्धांतःकरणस्य तत्त्वज्ञानोदये पर
ब्रह्मानंदप्राप्तिः स्यात्। तत्रैव च सर्वानंदप्राप्तेर्न क्षुद्रानंदप्राप्तिनिबंधनवैयग्र्यावकाशः। अ
तः परमानंदप्रापकाय तत्त्वज्ञानाय निष्कामकर्माणि कुर्वित्यभिप्रायः। अत्र यथा तथा भव
तीति पदद्वयाध्याहारः यावांस्तावानिति पदद्वयानुषंगो वा द्यदाशीतिके द्रष्टव्यः। ४६॥ रामजी

कासारः सरसी सरः॥

उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका

50

ननु निष्कामकर्मभिरात्मज्ञाने संपाद्यपरमानंदप्राप्तिः क्रियते चेदात्मज्ञानमेव तर्हि संपाद्यतां किं
बह्वायासैः कर्मभिर्बहिरंगसाधनभूतैरित्याशंक्याह ॥ कर्मण्येवेति ॥ तव मुमुक्षोः करणस्य
तात्त्विकज्ञानोत्पत्तियोग्यस्य कर्मण्येवांतःकरणशोधके अधिकारो मयेदं कर्तव्यमिति बोधो
स्तु न ज्ञाननिष्ठारूपे वेदांतवाक्यविचारादौ कर्म च कुर्वतस्तव तत्फलेषु स्वर्गादिषु कदाचन
कस्यांचिदप्यवस्थायां कर्मानुष्ठानात्प्रागूर्ध्वं तत्काले वा अधिकारो मयेदं भोक्तव्यमिति बोधो

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ॥ मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥
४७

मास्तु ॥ ननु मयेदं भोक्तव्यमिति बुद्ध्यभावेऽपि कर्मस्वसामर्थ्यादेव फलं जनयिष्यतीति चेन्नेत्
याह ॥ मा कर्मफलहेतुर्भूः ॥ फलकामनया हि कर्म कुर्वन् फलस्य हेतुरुत्पादको भवति त्वं
तु निष्कामः सन् कर्मफलहेतुर्मा भूः ॥ न हि निष्कामेन भगवदर्पणबुद्ध्या कृतं कर्म फला
य कल्पते इत्युक्तं ॥ फलाभावेऽपि कर्मणां मा ते संगोऽस्त्वकर्मणि यदि फलं नेष्यते किं क
र्मणा दुःखरूपेणेति अकरणे तव प्रीतिर्मा भूत् ॥ ४७ ॥ ॐ नमः शिवाय ॥ शुभम्

पूर्वोक्तमेव विवृणोति ॥ योगस्थ इति हे धनंजय त्वं योगस्थः सन् संगं फलाभिलाषं कर्तृत्वाभिनिवेशं च त्यक्त्वा कर्माणि कुरु अत्र वक्तृवचनात्कर्मणोपकार्यकारत्व इत्यत्र जातावेकवचनं ॥ संगत्यागोपायमाह ॥ सिद्ध्यसिद्ध्योः समो भूत्वा फलसिद्धौ हर्षं फलासिद्धौ च विषादं त्यक्त्वा ॥ केवलमीश्वराराधनबुद्ध्या कर्माणि कुर्वित्यर्थः ननु योगशब्देन प्राक् कर्मोक्तं ॥ अत्र तु योगस्थः कर्माणि कुर्विति उच्यते ॥ अतः कथमेतद्बोद्धुं शक्यमित्यत आह ॥ समत्वं योग उच्यते ॥ यदेतत्सिद्ध्यसिद्ध्योः समत्वं

51

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय ॥ सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥ ॥

इदमेव योगस्थ इत्यत्र योगशब्देनोच्यते न तु कर्मेति ॥ न कोपि विरोध इत्यर्थः ॥ अत्र पूर्वार्धस्योत्तरार्धेन व्याख्यानं क्रियत इत्यपौनरुक्त्यमिति भाष्यकारीयः पंथाः सुखदुःखे समे कृत्वेत्यत्र जयाजयसामान्येन युद्धमात्रकर्तव्यता प्रकृतत्वादुक्ता ॥ इह त्वदृष्टसर्वफलपरित्यागेन सर्वकर्मकर्तव्यतेति विशेषः ॥ ४८ ॥ ॥ श्रीरामाय नमो नमः ॥ ॥ ॥ ॥ ॥ ॥ ॥

दुश

ननु किं कर्मानुष्ठानमेव पुरुषार्थो येन निष्फलमेवं सदा कर्तव्यमित्युच्यते ॥ प्रयोजनमनुद्दिश्य न मंदोपि प्रवर्तत इति न्यायात् अतः फलकामनयैव कर्मानुष्ठानमिति चेत् तत्राह । दूरेणेति बुद्धियोगात् आत्मबुद्धिसाधनभूतात् निष्कामकर्मयोगात् दूरेण अतिविप्रकर्षेण अवरं अधमं कर्म फलाभिसंधिना क्रियमाणं जन्ममरणहेतुभूतं ॥ अथवा परमात्मबुद्धियोगात् दूरेण अवरं सर्वमपि कर्म हि यस्मात् ॥ हे धनंजय तस्मात् बुद्धौ परमात्मबुद्धौ सर्वानर्थनिवर्तिकायां शरणं प्रतिवधकपापद्वयेणार्द्वकं निष्कामकर्मयोगमन्विच्छ कर्तुमिच्छ ॥ ये तु फलहेतवः फलकामाः

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ॥ बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ४९

फलं फलेच्छा हेतुः कर्मप्रवृत्तौ येषां ते फलहेतवः ॥

दा

अवरं कर्म कुर्वंतीति ते कृपणाः सर्वदा जन्ममरणादिघटीयंत्रभ्रमणेन परवशाः अत्यंतदीना इत्यर्थः यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः ॥ तथा च त्वमपि कृपणो माभूः किंतु सर्वानर्थनिवर्तकात्मज्ञानोत्पादकं निष्कामकर्मयोगमेवानुतिष्ठेत्यभिप्रायः ॥ यथा हि कृपणा जना अतिदुःखेन धनमर्जयंतो यत्किंचिद्दृष्टसुखमात्रलोभेन दानादिजनितं महत्सुखमनुभवितुं न शक्नुवंतीत्यात्मानमेव वंचयंति तथा महता दुःखेन कर्माणि कुर्वाणाः तुच्छफलमात्रलोभेन परमानंदानुभवेन वंचिता इत्यहो दौर्भाग्यं मौढ्यं च तेषामिति कृपणपदेन ध्वनितं ॥ ४९ ॥

एवं बुद्धियोगाभावे दोषमुक्त्वा तद्भावे गुणमाह ॥ बुद्धियुक्त इति ॥ इह कर्मसु बुद्धियुक्तः समत्वबुद्ध्या युक्तो
जहाति परित्यजति उभे सुकृतदुष्कृते पुण्यपापे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यस्मादेवं तस्मात्समत्व
बुद्धियोगाय त्वं युज्यस्व घटस्व उद्युक्तो भव ॥ यस्मादीदृशः समत्वबुद्धियोगः ईश्वरार्पितचेतसः कर्मसु
प्रवर्तमानस्य कौशलं कुशलभावः यद्बन्धहेतूनामपि कर्मणां तदभावो मोक्षपर्यवसायित्वं
च तन्महत्कौशलं ॥ समत्वबुद्धियुक्तः कर्मयोगः कर्मात्मापि सन् दुष्कर्मद्वयं करोतीति महाकु

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते । तस्माद्योगाय युज्यस्व योगः कर्मसु कौशले ॥ ५० ॥

शलः ॥ तेन च न कुशलः यतश्च न तेनापि सन् सजातीयदुष्कृतद्वयं न करोतीति व्यतिरेकोऽत्र ध्वनितः
अथवा इह समत्वबुद्धियुक्ते कर्मणि कृते सति सत्त्वशुद्धिद्वारेण बुद्धियुक्तः परमात्मसाक्षात्कार
वान्सन् जहाति उभे सुकृतदुष्कृते तेन तस्मात्समत्वबुद्धियुक्ताय कर्मयोगाय युज्यस्व ॥ यस्मात्क
र्मसु मध्ये समत्वबुद्धियुक्तः कर्मयोगः कौशले कुशलः दुष्कर्मनिवारणे चतुर इत्यर्थः ॥ ५० ॥

ननु तत्कृतहानमपेक्षितं न तु तत्कृतहानेन पुरुषार्थभ्रंशापत्ते रित्याशंक्या तत्फलत्यागेन परम पुरुषार्थप्राप्तिफलमाह ॥ कर्मजमिति समत्वबुद्धियुक्ता हि यस्मात्कर्मजं फलं त्यक्त्वा केवलमीश्वराराधनार्थं कर्माणि कुर्वाणाः तत्वबुद्धिद्वारेण मनीषिणः तत्वमस्यादिवाक्यजन्यात्ममनीषावंतो भवंति तेन ते शास्त्रसंस्कृता जन्मात्मके नवं धे विनिर्मुक्ताः विशेषेणात्यंतिकत्वलक्षणेन निरवशेषं मुक्ताः पदं पदनीयमात्मतत्त्वमानंदरूपं ब्रह्माख्यं नामयं सर्वा विद्या तत्कार्या

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं

५१

निष्कामकर्मभिः

त्मकरोगरहितमभयं मोक्षाख्यं पुरुषार्थं गच्छंत्यभेदेन प्राप्नुवंतीत्यर्थः ॥ यस्मादेवं फलकामनां त्यक्त्वा समत्वबुद्ध्या कर्माण्यनुतिष्ठंतः तैः कृतांतःकरणशुद्धयः ॥ तत्वमस्यादिप्रमाणोत्पन्नात्मतत्वज्ञानविनष्टाज्ञानतत्कार्याः संतः सकलानर्थनिवृत्ति परमानंदप्राप्तिरूपं मोक्षाख्यं विष्णोः परमं पदं गच्छंति ॥ तस्मात्त्वमपि यत्र श्रेयः स्यान्निश्चितं ब्रूहि तन्मे इत्युक्तेः श्रेयोऽसि ज्ञास्तु रेवं विधं कर्मयोगमनुतिष्ठेति भगवतोऽभिप्रायः । ५१ ॐ नमः शिवाय नमः

५

गी॰टी॰
म॰ ष्टि॰
५२

एवं कर्माणि पनतिष्ठतः कदा मे सत्त्वशुद्धिः स्यादित्यत आह ॥ यदेति तत्[illegible]स्य बुद्धि
र्भवतीति कालनियमो नास्ति ॥ किन्तु यदा यस्मिन्काले ते तव बुद्धिरंतःकरणं मोहकलिलं व्यतितरि
ष्यति अविवेकात्मकं कालुष्यमहमिदं ममेदमित्याद्यज्ञानविलसितं मृत्तिकामिव अतिक्रमि
ष्यति रजस्तमोमलमपहाय शुद्धभावमापत्स्यत इति यावत् तदा तस्मिन्नेव काले श्रोतव्यस्य
श्रुतस्य च कर्मफलस्य निर्वेदं वैतृष्ण्यं गंतासि प्राप्नोति ॥ परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥
॥५२॥

निर्वेदमायादिति श्रुतेः ॥ निर्वेदेन फलेनांतःकरणशुद्धिर्ज्ञास्यसीत्यभिप्रायः ॥५२॥ अन्तःक
रणशुद्ध्येवं जातनिर्वेदस्य कदा ज्ञानप्राप्तिरित्यपेक्षायामाह ॥ श्रुतिविप्रतिपन्नेति ते तव बु
द्धिः श्रुतिभिर्नानाविधफलश्रवणैरविचारिततात्पर्यैर्विप्रतिपन्ना अनेकविधसंशयवि
पर्यासवत्त्वेन विक्षिप्ता प्राक् यदा यस्मिन्काले शुद्धिजविवेकजनि ॥ ॥ ॥ रामजीसहा

५२

तेनदोषदर्शिनेनतेविक्षेपंपरित्यज्यसमाधौपरमात्मनिनिश्चलाजाग्रत्स्वप्नदर्शनलक्षणाविक्षे
परहिताः अचलासुषुप्तिमूर्छाकालस्थीभावादिरूपपलक्षणाचलनरहितासतीस्थास्यतितल
यविक्षेपलक्षणोदोषोपरित्यज्यसमाहिताभविष्यतीतियावत् ॥ अथवानिश्चलाःसंभा
वनाविपरीतभावनारहिता ॥ अचलादीर्घकालादरनैरंतर्यसत्कारसेवनैर्विजातीयप्रत्य

श्रुतिविप्रतिपन्नाते ॥ यदास्थास्यतिनिश्चला ॥
समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि ॥ ५३

याहूषितासतीनिर्वातप्रदीपवदात्मनिस्थास्यतीतियोजनातदातस्मिन्कालेयोगंजीवपर
मात्मैक्यलक्षणंतत्वमस्यादिवाक्यजन्यमखंडसाक्षात्कारंसर्वयोगफलमवाप्स्यसि ॥
तदापुनःसाध्यांतराभावात्कृतकृत्यःस्थितप्रज्ञोभविष्यसीत्यभिप्रायः ॥ ५३ ॥ श्रीराम ॥

एवं लब्धावसरः स्थितप्रज्ञलक्षणं ज्ञातुमर्जुन उवाच ॥ यान्येव हि जीवन्मुक्तानां लक्षणानि तान्येव मुमुक्षूणां मोक्षोपायभूतानीति मन्वानः स्थितप्रज्ञस्येति स्थिता निश्चला अहं ब्रह्मास्मीति प्रज्ञा यस्य स स्थितप्रज्ञः अवस्थाद्वयवान् समाधिस्थो व्युत्थितचित्तश्चेति अतो विशिनष्टि समाधिस्थस्य स्थितप्रज्ञस्य का भाषा ॥ कर्मणि षष्ठी ॥ भाष्यतेऽनयेति भाषा लक्षणं समाधिस्थः स्थितप्रज्ञः केन लक्षणेनान्यैर्व्यवह्रियत इत्यर्थः ॥ स्वव्युत्थितचित्तः स्थितधीः स्थितप्रज्ञः स्वयं किं प्रभा-

अर्जुन उवाच स्थितप्रज्ञस्य का भाषा । समाधिस्थस्य केशव
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥ ॥

षेत स्तुतिनिन्दाभिमन्दनद्वेषादिलक्षणं किं कथं प्रभाषेतेति सर्वत्र संभावनायां लिङ् ॥ तथा किमासीत व्युत्थितचित्तनिग्रहाय कथं वहिरिन्द्रियाणां निग्रहं करोति ॥ तन्निग्रहाभावकाले च किं व्रजेत कथं विषयान् प्राप्नोतीति तत्कर्तृकभाषणासनव्रजनानि मूढजनविलक्षणानि कीदृशानीत्यर्थः ॥ तदेवं चत्वारः प्रश्नाः समाधिस्थस्थितप्रज्ञे एकः ॥ व्युत्थितस्थितप्रज्ञे त्रय इति ॥ केशवेति संबोधयन् सर्वान्तर्यामितया त्वमेवैतादृशं रहस्यं वक्तुं समर्थोऽसीति सूचयति ॥ ५४ ॥

एतेषां चत्तर्णां प्रश्नानां क्रमेणोत्तरं भगवानुवाच प्रजहातीतियावदध्यायसमाप्ति ॥ कामान् कामसंकल्पादीन् मनोवृत्तिविशेषान् ॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतिभेदेन तेत्रांतरे पंचधाप्रपंचितान् सर्वान्निर्वशेषान् प्रकर्षेणावाधेन यदा जहाति परित्यजति सर्ववृत्तिशून्य एव यदा भवति स्थितप्रज्ञस्तदोच्यते समाधिस्थ इति शेषः कामानामनात्मधर्मत्वेन परित्यागयोग्यतामाह ॥ मनोगतानिति ॥ यदि ह्यात्मधर्माः स्युः तदा न त्यक्तुं शक्येरन् वह्नेरौष्ण्यवत् स्वाभाविकत्वात् ॥ मनसस्तु धर्मा एते ॥ अतस्तत्परित्यागेन प।

ए कार १

श्रीभगवानुवाच प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते । ५५ ।

रित्यक्तुं शक्या एवेत्यर्थः ॥ ननु स्थितप्रज्ञस्य मनःप्रसादलिंगगम्यः संतोषविशेषः प्रतीयते । स कथं सर्वकामपरित्यागे स्यादित्याह ॥ आत्मन्येव परमानंदरूपे न त्वनात्मनि तुष्टः आत्मना स्वप्रकाशचिद्रूपेणाभासमानेन ॥ न तु बाह्यैस्तुष्टः परितृप्तः परमपुरुषार्थलाभात् ॥ तथा च श्रुतिः ॥ यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि स्थिताः अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥ तथा च समाधिस्थः स्थितप्रज्ञः एवंविधैर्लक्षणवाचिभिः शब्दैर्भाष्यत इति प्रथमप्रश्नस्योत्तरं ॥ ५५ ॥ श्रीरामजीसहाहै ॥ ॥ ॥ ॥

गी॰टी॰
म॰ द्वि॰
५८

इदानीं व्युत्थितचित्तस्य स्थितप्रज्ञस्य भाषणोपवेशनगमनानि मूढजनविलक्षणानि व्याख्येयानित
त्र किं प्रभाषेतेत्यस्योत्तरमाह दुःखेष्विति द्वाभ्यां ॥ दुःखानि त्रिविधानि ॥ शोकमोहज्वरशिरोरोगादि
निमित्तान्याध्यात्मिकानि ॥ व्याघ्रसर्पादिप्रयुक्तान्याधिभौतिकानि ॥ अतिवातातिवृष्ट्यादिहेतु
कान्याधिदैविकानि ॥ तेषु दुःखेषु रजःपरिणामसंतापात्मकचित्तवृत्तिविशेषेषु प्रारब्धपाप
कर्मप्रापितेषु नोद्विग्नं दुःखपरिहाराक्षमतया व्याकुलं न भवति मनो यस्य सोऽनुद्विग्नमनाः ॥ अ
विवेकिनो हि दुःखप्राप्तौ सत्यामहो पापोऽहं धिङ्मां दुरात्मानमेतादृशदुःखभागिनं को मे दुःखमीदृ
शं निराकुर्यादित्यनुतापात्मको भ्रान्तिरूपः तामसश्चित्तवृत्तिविशेष उद्वेगाख्यो जायते ॥ यद्यपि पा
पानुष्ठानसमये स्यात्तदा तत् अदृष्टप्रतिबंधकत्वेन सफलः स्यात् ॥ भोगकाले तु भवत्कारणे सति
कार्यस्यावश्यकत्वमशक्यत्वाद्विफलप्रयोजनो दुःखकारणे सत्यपि किमिति मम दुःखं जायत इति अविवे
कजभ्रमरूपत्वात् विवेकिनः स्थितप्रज्ञस्य न संभवति ॥ दुःखमात्रं हि प्रारब्धकर्मणा प्राप्यते न
तु तदुत्तरकालीनो भ्रमोऽपि ॥ ननु दुःखान्तरकारणत्वात् सोऽपि प्रारब्धकर्मान्तरेण प्राप्यतामिति
चेन्नत ॥ स्थितप्रज्ञस्य भ्रमोपादानाज्ञाननाशेन भ्रमासंभवात् जन्यदुःखप्रापकप्रारब्धाभा
वात् ॥ यथाकथंचिद्देहयात्रामात्रनिर्वाहकप्रारब्धकर्मफलस्य च भ्रमाभावेऽपि बाधितानुवृ
त्त्योपपत्तेरिति विस्तरेणाग्रे वक्ष्यते ॥ तथा सुखेषु सत्त्वपरिणामरूपप्रीत्यात्मकचित्तवृत्तिविशे
षेषु त्रिविधेषु प्रारब्धपुण्यकर्मप्रापितेषु विगतस्पृहः आगामितज्जातीयसुखस्पृहारहितः स्पृहा

पा

54

व्याकुलता

भ्रमोऽपि

ऽर्थ

५८

आध्यात्मिकाधिभौतिकाधिदैविकेषु = १

५८

हिनाम सुखानुभवकाले तज्जातीयस्य सुखस्य कारणं ॥ यमि मननस्यायह् थैव तदा कांक्षानुपाता मसी चिन्ता
हन्ति भ्रांतिरेव सा चाविवेकिन एव जायते ॥ नहि कारणाभावे कार्यं भवितुमर्हति ॥ अतो यथा सति का
रणे कार्यं माभूदिति इष्याकांक्षानुपउद्वेगो विवेकिनो न संभवति ॥ तथैवासति कारणे कार्यं भूयादि
ति इष्याकांक्षानुपात्मिका स्पृहापि नोपपद्यते ॥ प्रारब्धकर्मणा सुखमात्रप्रापकत्वात् ॥ इदमिति
कांक्षाचिन्ता हन्ति निःस्पृहाशब्देनोक्ता सापि भ्रांतिरेव ॥ अहो धन्योहं यस्य ममेदृशं सुखमुपस्थितं कोवा म
यातुल्योस्ति भुवने केन वा पायेन ममेदृशं सुखं न विच्छिद्येतेत्येवमात्मिकोत्फुल्लतानुपाता मसी चिन्ता ह
न्तिः अत एवोक्तं भाष्ये ॥ नाग्निर्विवर्धयनाद्याथानेयः सुखान्यनुविवर्धते स विगतस्पृह इति वक्ष्यति च

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनि
रुच्यते ॥ ॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियमिति ॥ सापि न विवेकिनः संभवति भ्रांति
त्वात् तथा वीतरागभयक्रोधः । रागः शोभनाध्यासनिबंधनो विषयेषु रंजनात्मकश्चित्तवृत्तिविशेषोस्ति
ताभिनिवेशरूपः रागविषयस्य नाशके समुपस्थिते तन्निवारणसामर्थ्यमात्मनो मन्यमानस्यादैन्यात्म
कश्चित्तवृत्तिविशेषो भयम् ॥ रागविषयस्य नाशके समुपस्थिते तन्निवारणसामर्थ्यमात्मनो मन्यमान
स्याभिज्वलनात्मकश्चित्तवृत्तिविशेषः क्रोधः । ते सर्वे विपर्ययरूपत्वात् विगता यस्मात् स तथा एतादृशो मु
निर्मननशीलः संन्यासी स्थितप्रज्ञ उच्यते एवं लक्षणः स्थितधीः स्वानुभवप्रकटनेन शिष्यशिक्षार्थम
नुद्वेगनिःस्पृहत्वादिवाचः प्रभाषत इत्यर्थः उक्तः । एवं चान्योपि मुमुक्षुर्दुःखेनोद्विजेत सुखेन प्रहृ
ष्येत् रागभयक्रोधरहितश्च भवेदित्यभिप्रायः । ५६ ॥

गी॰ टी॰
म॰ द्वि॰
५५

किंच यः इति सर्वत्र सर्वेषु देहजीवनादिष्वपि यो मुनिरनभिस्नेहः यस्मिन्सत्यन्यदीये हानिवृद्धी स्वस्मिन्ना
रोप्येते स मनाहं शोत्यविषयः प्रेमापरपर्यायस्तामसो वृत्तिविशेषः स्नेहः सर्वप्रकारेणानेन रहितोऽनभि
स्नेहः ॥ भगवति परमात्मनि तु सर्वथाऽभिस्नेहवानेव भवेदेव अनात्मस्नेहाभावस्य तदर्थत्वात् इति
द्रष्टव्यं ॥ तत्तत्प्रारब्धकर्मपरिप्रापितं शुभं सुखहेतुं विषयं प्राप्य नाभिनंदति हर्षविशेषपुरःस
रं न प्रशंसति अशुभं दुःखहेतुं विषयं प्राप्य न द्वेष्टि अन्तरसूयापूर्वकं न निंदति अत्र तस्य हि स्वसुखहेतुर्यः
स्वकलत्रादिः सम्यग्भो विषयस्तद्गुणाकथनादिप्रवर्तिका धीवृत्तिर्भ्रांतिरूपाऽभिनंदः स च तामसः ॥
तद्गुणाकथनादेः परप्ररोचनार्थत्वाभावेन व्यर्थत्वात् ॥ एवं परमसूयोत्पादनेन दुःखहेतुः परकी

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं ॥ नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥

55

यस्त्रियाप्रकर्षादिदेवेन प्रत्यशुभो विषयः तन्निंदादिप्रवर्तिका भ्रांतिरूपा धीवृत्तिर्द्वेषः सोऽपि तामसः
तन्निंदाया निवारणासमर्थत्वाभावेन व्यर्थत्वात् ॥ तावभिनन्दद्वेषौ भ्रांतिरूपौ तामसौ कथमभ्रांते
शुद्धसत्वे स्थितप्रज्ञे संभवेतां ॥ तस्माद्धर्षचालनकभावात्तस्यानभिस्नेहस्य हर्षविषादरहितस्य मु
नेः प्रज्ञा परमात्मतत्वविषया प्रतिष्ठिता फलपर्यवसायिनी स स्थितप्रज्ञ इत्यर्थः ॥ एवमन्योपि
मुमुक्षुः सर्वत्रानभिस्नेहो भवेत् शुभं प्राप्य न प्रशंसेत् ॥ अशुभं प्राप्य न निंदेदित्यभिप्रा
यः ॥ अत्र च निंदाप्रशंसादिरूपा वाचो न प्रभाषेत इति व्यतिरेक उक्तः ॥ ५७ श्रीरामजी ॥

परकीयस्त्रियाप्र
कर्षादेः = २

नु

५५

आत्मप्रज्ञायाः = ८

इदानीं किमासीतेति प्रश्नस्योत्तरं वक्तुमारभते भगवान् यदित्यादि षड्भिः श्लोकैः । तत्र च प्रारब्धकर्म
वशाद्व्युत्थाने तेन विक्षिप्तानीन्द्रियाणि पुनरुपसंहृत्य समाध्यर्थमेव स्थितप्रज्ञस्योपवेशनमिति
दर्शयितुमाह ॥ यदेति ॥ अयं व्युत्थितः सर्वशः सर्वाणीन्द्रियाणीन्द्रियार्थेभ्यः शब्दादिभ्यः सर्वे
भ्यश्च पुनरर्थे यदा पुनः संहरते पुनरुपसंहरति संकोचयति ॥ तत्र दृष्टान्तः ॥ कूर्मोऽङ्गानीव त
दा तस्य प्रज्ञा प्रतिष्ठितेति स्पष्टं ॥ पूर्वश्लोकाभ्यां व्युत्थानदशायामपि सकलतामसहत्यभाव उ
क्तः अधुना तु पुनः समाध्यवस्थायां सकलसहत्यभाव इति विशेषः । ५८ ॥ ननु मूढस्यापि रोगा
दिवशाद्विषयेभ्य इन्द्रियाणामुपसंहरणं भवति तत्कथं तस्य प्रज्ञा प्रतिष्ठितेत्युक्तमत आह । वि

यदा संहरते चायं । कूर्मोऽङ्गानीव सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥
विषया विनिवर्तन्ते ॥ निराहारस्य देहिनः ॥ रसवर्जं रसोऽप्यस्य ॥ परं दृष्ट्वा निवर्तते । ५९ ॥

षया इति निराहारस्येन्द्रियैर्विषयाननाहरतो देहिनो देहाभिमानवतो मूढस्यापि रोगिणः काष्ट
तपस्विनो वा विषयाः शब्दादयो विनिवर्तन्ते ॥ किंतु रसवर्जं रसस्तृष्णा तं वर्जयित्वा ॥ अज्ञस्य
विषया निवर्तन्ते तद्विषयो रागस्तु न निवर्तत इत्यर्थः ॥ अस्य तु स्थितप्रज्ञस्य परं पुरुषार्थं दृष्ट्वा त
देवाहमस्मीति साक्षात्कृत्य स्थितस्य रसोऽपि क्षुद्रसुखरागोऽपि निवर्तते ॥ अपिशब्दाद्विषयाश्च त
था च यावानर्थ इत्यादौ व्याख्यातं ॥ एवं च सरागविषयनिवृत्तिः स्थितप्रज्ञलक्षणमिति न मूढे व्यभि
चार इत्यर्थः ॥ यस्मान्नासति परमात्मसम्यग्दर्शने सरागविषयोच्छेदः तस्मात्सरागविषयोच्छेदिका

निवर्तन्त इत्यनेनान्वयः =२

गी॰ टी॰
म॰ द्वि॰
५६

भा

तत्र प्रज्ञास्थैर्यं बाह्येन्द्रियनिग्रहो मनोनिग्रहश्चासाधारणं तदुभयाभावे प्रज्ञानाशाद्दर्शनादि
ति वक्तुं बाह्येन्द्रियनिग्रहाभावे प्रथमं दोषमाह॥ यततइति हे कौन्तेय॥ यततो भूयो भूयो वि
षयदोषदर्शनात्मकं यत्नं कुर्वतोपि॥ चक्षिङो ङित्वकरणादनुदात्तेतो नावश्यकमात्मनेप
दमिति ज्ञापनात्परस्मैपदमविरुद्धं॥ विपश्चितः अत्यन्तविवेकिनोपि पुरुषस्य मनः क्षण
मात्रे निर्विकारं कृतमपि इन्द्रियाणि हरन्ति विकारं प्रापयन्ति॥ नन्वविरोधिनि विवेके स

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः॥ इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥६०॥

ति कुतो विकारप्राप्तिस्तत्राह॥ प्रमाथीनि प्रमथनशीलानि अतिबलीयस्त्वाद्विवेकोपमर्दनद
मानि अतः प्रसभं प्रसह्य बलात्कारेण पश्यत एव विपश्चितः स्वामिनि विवेके च रक्षके सति
सर्वप्रमाथित्वादेवेन्द्रियाणि विवेकजप्रज्ञायां प्रविष्टं मनः ततः प्रच्याव्य स्वविषयावि
ष्टत्वेन हरन्तीत्यर्थः॥ हिशब्दः प्रसिद्धिं द्योतयति॥ प्रसिद्धो ह्ययमर्थो लोके यथा प्रमाथिनो
दस्यवः प्रसभमेव धनिनं धनरक्षिणं चाभिभूय तयोः पश्यतोरेव धनं हरन्ति तथेन्द्रियाण्य।

56

एवं तर्हि तत्र कः प्रतीकार इत्यत आह ॥ तानीति तानींद्रियाणि सर्वाणि ज्ञानकर्मसाधनभूतानि संयम्य वशीकृत्य युक्तः समाहितो निगृहीतमनाः सन्नासीत निर्व्यापारस्तिष्ठेत् ॥ प्रमाथिनां कथं स्ववशीकरणमिति चेत्तत्राह मत्पर इति ॥ अहं सर्वात्मा वासुदेव एव परं उत्कृष्टं उपादेयो यस्य स मत्परः एकांतमद्भक्त इत्यर्थः ॥ तथा चोक्तं ॥ न वासुदेवभक्तानामशुभं विद्यते क्वचिदिति ॥ यथा हि लोके बलवंतं राजानमाश्रित्य दस्यवो निगृह्यंते राजाश्रितोयमिति ज्ञात्वा चौराः स्वयमेव तदधृष्या भवंति तथैव

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१

भगवंतं सर्वांतर्यामिणमाश्रित्य तत्प्रभावेनैव दुष्टानींद्रियाणि निग्राह्याणि पुनस्त्वं भगवदाश्रितोयमिति मत्वा तानि तदधृष्याण्येव भवंतीति भावः ॥ यथा च भगवद्भक्तेर्महाप्रभावत्वं तथा विस्तरेणाग्रे व्याख्यास्यामः ॥ इंद्रियवशीकारे फलमाह ॥ वशे हीति स्पष्टं ॥ तदेतद्वशीकृतेंद्रियः सन्नासीतेति किमासीतेति प्रश्नस्योत्तरमुक्तं भवतीति ॥ ६१ ॥ श्रीराम ॥

गी॰ टी॰
म॰ हि॰
५८

ननु मनसो वाह्येंद्रियप्रवृत्तिद्वारा ऽनर्थहेतुत्वं निगृहीतवाह्येंद्रियस्य तु तदभावात्तदेकं शरीरं गावत्मनस्यनिगृहीतेपि न कापि क्षतिः वाह्येन्द्रियोपयोगाभावेनैव कृतकृत्यत्वादतो युक्त आसीतेति व्यर्थमुक्तमित्याशंक्य निगृहीतवाह्येंद्रियस्यापि युक्तत्वाभावे सर्वानर्थप्राप्तिमाह ध्यायत इति द्वाभ्यां॥ निगृहीतवाह्येंद्रियस्यापि शब्दादीन्विषयान्ध्यायतो मनसा पुनः पुनश्चिंतयतः पुंसः तेषु विषयेषु संगः आसंगः ममात्यंतमेवैते सुखहेतव इत्येवं शोभनाध्यासलक्षणा प्रीतिविशेष उपजायते॥ संगात्सुखहेतुत्वज्ञानलक्षणात्संजायते कामः ममैते भवंत्विति तृष्णाविशेषः॥ तस्मात्कामात्केनचित्प्रतिहन्यमानात्प्रतिघातकविषयः क्रोधोऽभिज्वलनात्माभिजायते क्रोधाद्भवति संमोहः कार्याकार्यविवेकाभा

ध्यायतो विषयान्पुंसः संगस्तेषूपजायते। संगात्संजायते कामः कामात्क्रोधोऽभिजायते ६२
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः। स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३

वरूपः संमोहात्स्मृतिविभ्रमः स्मृतेः शास्त्राचार्योपदिष्टार्थानुसंधानस्य विभ्रमः विचलनं विभ्रंशः तस्माच्च स्मृतिभ्रंशाद्बुद्धिनाशः बुद्धेरैकात्म्याकारमनोवृत्तेः नाशः विपरीतभावनोपचयदोषेण प्रतिबंधात् अनुत्पत्तिः उत्पन्नाया अपि फलायोग्यत्वेन विलयः बुद्धिनाशात्प्रणश्यति तस्याः फलभूताया बुद्धेर्विलोपात्प्रणश्यति सर्वपुरुषार्थायोग्यो भवति॥ यो हि पुरुषार्थायोग्यो जातः स मृत एवेति लोके व्यवह्रियते॥ अतः प्रणश्यतीत्युक्तं॥ यस्मादेवं मनसोऽनिग्रहाभावे निगृहीतवाह्येंद्रियस्यापि पुनरनर्थप्राप्तिः तस्मान्महता प्रयत्नेन मनो निगृह्णीयादित्यभिप्रायः। अतो युक्त उक्तेत्तानि सर्वाणी

५८

मनसिनिगृहीतेतुबाह्येन्द्रियनिग्रहाभावेपिनदोषइतिवदन्किंव्रजेतेतिप्रश्नस्योत्तरमाहरागद्वे
षवियुक्तैरित्यादिद्वाभ्यांयोसमाहितचेताःसबाह्येन्द्रियाणिनिगृह्यापिरागद्वेषदुष्टेनम
नसाविषयांश्चिन्तयन्पुरुषार्थाद्भ्रष्टोभवति॥ विधेयात्मातुतुशब्दःपूर्वस्माद्व्यतिरेकार्थः
वशीकृतान्तःकरणस्त्वात्मवश्यैर्मनोधीनैःस्वाधीनैरितिवारागद्वेषाभ्यांवियुक्तैःवि
रहितैरिन्द्रियैःश्रोत्रादिभिःविषयान्शब्दादीननिषिद्धांश्चरन्नुपलभमानः॥ प्रसादं।
प्रसन्नतांचित्तस्यस्वच्छतांपरमात्मसाक्षात्कारयोग्यतामधिगच्छति॥ रागद्वेषप्रयुक्तानि
हीन्द्रियाणिदोषहेतुतांप्रतिपद्यन्तेमनसिस्ववशेतुनरागद्वेषैस्तयोरभावेचनतदधीनेन्द्रियप्र

रागद्वेषवियुक्तैस्तुविषयानिन्द्रियैश्चरन्॥ आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति

६४

वृत्तिःअवर्जनीयतयातुविषयोपलम्भोनदोषमावहतीतिनशुद्धिव्याघातइतिभावः॥ एतेनवि।
षयाणांस्मरणमपिचेदनर्थकारणंतर्हिभोगःतेनजीवनार्थंविषयान्भुञ्जानःकथमन
र्थंनप्रतिपद्येतेतिशंकानिरस्ता। स्वाधीनैरिन्द्रियैर्विषयान्प्राप्नोतीतिचकिंव्रजेतेतिप्रश्नस्योत्त

गी॰ टी॰
स॰ द्वि॰
५८

प्रसादमधिगच्छतीत्युक्तं तत्र प्रसादे सति किं स्यादित्युच्यते प्रसाद इति ॥ चित्तस्य प्रसादे स्वच्छत्वरूपे सति सर्वदुःखानामाध्यात्मिकादीनामज्ञानविलसितानां हानिर्विनाशोऽस्य यतेरुपजायते । हि यस्मात् ॥ प्रसन्नचेतसो यतेराशु शीघ्रमेव बुद्धिर्ब्रह्मात्मैक्याकारा पर्यवतिष्ठते परि समन्तादवतिष्ठते स्थिरा भवति ॥ विपरीतभावनादिप्रतिबन्धाभावात् ॥ ततश्च प्रसादे सति बुद्धिपर्यवस्थानेन सतत्त्वहितोऽध्यज्ञाननिवृत्तिः तत्सत्कार्यसकलदुःखहानिरिति क्रमेणापि प्रसादे यत्नाधिक्याय सर्वदुःखहानिकरत्वकथनमिति न विरोधः । ६५ । इममेवार्थं व्यतिरेकमुखेन द्रढयति नास्तीति ।

प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥ प्रसन्नचेतसो ह्याशु बुद्धिः पर्य
वतिष्ठते ॥ ६५ ॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ॥ न चाभाव
यतः शान्तिरशान्तस्य कुतः सुखं ॥ ६६ ॥ ॥

अयुक्तस्याजितचित्तस्य बुद्धिरात्मविषया श्रवणमननाख्यवेदान्तविचारजन्या नास्ति नोत्पद्यते । न तु भावेन चायुक्तस्य भावना निदिध्यासनात्मिका विजातीयप्रत्ययानन्तरितसजातीयप्रत्यय प्रवाहरूपा सर्वत्र नञो न्नास्तीत्यनेनान्वयः ॥ न चाभावयतश्चात्मनः शान्तिः सकार्याविद्यानिवृत्तिरूपा वेदान्तवाक्यजन्या ब्रह्मात्मैक्यसाक्षात्कृतिः अशान्तस्यात्मसाक्षात्काररहितस्य कुतः सुखं

श्री

५८

अयुक्तस्य कुतो नास्ति बुद्धिरित्यत आह ॥ इन्द्रियाणामिति चरतां स्वविषयेषु प्रवर्तमानानामवशी
कृतानामिन्द्रियाणां मध्ये यदेकमपीन्द्रियमनुलक्षीकृत्य मनो विधीयते प्रवर्तते इति यावत्
कर्मकर्तरि लकारः ॥ तदिन्द्रियमेकमपि मनसानुसृतं ॥ अस्य साधकस्य मनसो वा प्रज्ञामात्मवि
षयां शास्त्रीयां हरति अपनयति ॥ मनसस्तद्विषयाविष्टत्वात् ॥ यदैकमपीन्द्रियं प्रज्ञां हर
ति ॥ तदा सर्वाणि हरन्तीति किमु वक्तव्यमित्यर्थः ॥ दृष्टान्तस्तु स्पष्टः ॥ अम्भस्येव वायोर्नौका
हरणसामर्थ्यं न भवतीति सूचयितुमम्भसीत्युक्तं ॥ एवं दार्ष्टान्तिकेप्यम्भःस्थानीये ॥ मनस्थाच

इन्द्रियाणां हि चरतां यन्मनोनुविधीयते ॥ तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ॥ इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता

लेपमतस्येव प्रज्ञाहरणसामर्थ्यमिन्द्रियस्य ततम्भःस्थानीये मनःस्थैर्ये यइति सूचितं ॥ हि यस्मादे
वं तस्मात् सर्वशः सर्वाणि समनस्कानि ॥ हे महाबाहो इति संबोधयन् ॥ सर्वशत्रुनिवारणाद्
मत्वादिन्द्रियशत्रुनिवारणेपि त्वं क्षमोसीति सूचयति ॥ स्पष्टमन्यत् ॥ तस्येति सिद्धस्य साधक
स्य च परामर्शः ॥ इन्द्रियसंयमस्य स्थितप्रज्ञं प्रति लक्षणत्वस्य मुमुक्षुं प्रति प्रज्ञासाधनत्व

गी॰टी॰
म॰ द्वि॰
५९

तदेवं मुमुक्षुणा प्रज्ञास्थैर्याय प्रयत्नतः सर्वेन्द्रियसंयमः कर्तव्य इत्युक्तं ॥ स्थितप्रज्ञस्य तु स्वतः सि
द्ध एव सर्वेन्द्रियसंयम इत्याह येति ॥ या वेदान्तवाक्यजनितसाक्षात्काररूपाहं ब्रह्मास्मीति प्रज्ञा सर्वभू
तानामज्ञानां निशेव निशा ॥ तान्प्रत्यप्रकाशरूपत्वात् ॥ तस्यां ब्रह्मविद्यालक्षणायां सर्वभूतनिशा
यां जागर्ति अज्ञाननिद्रायाः प्रबुद्धः सन्सावधानो वर्तते ॥ संयमी इन्द्रियसंयमवान् स्थितप्रज्ञ इ
त्यर्थः ॥ यस्यां तु द्वैतदर्शनलक्षणायामविद्यानिद्रायां प्रसुप्तान्येव भूतानि जाग्रति स्वप्नवद्व्यवह

59

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः

६९

रंति ॥ सा निशा न प्रकाशते आत्मतत्त्वं पश्यतो ऽपरोक्षतया मुनेः स्थितप्रज्ञस्य यावद्धि न प्रबुध्यते ता
वद्धि स्वप्नदर्शनं ॥ बाधपर्यंतत्वाज्जन्मस्य तत्त्वज्ञानकाले तु न भ्रमनिमित्तः कश्चिद्व्यवहारः तदुक्तं
वार्तिककारैः कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्यते ॥ शुद्धे वस्तुनि सिद्धे च कारकव्यापृतिस्तथा
काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः ॥ या निशा सर्वभूतानामित्यवोचत्स्वयं हरिरिति ॥ त

याचयस्यविपरीतदर्शनेनतस्यनवस्तुदर्शनंविपरीतदर्शनस्यवस्तुदर्शनजन्यत्वात्यस्य।
चवस्तुदर्शनेनतस्यनविपरीतदर्शनंविपरीतदर्शनकारणस्यवस्तुदर्शनस्यवस्तुदर्शनेन
बाधितत्वात्॥तथाचश्रुतिः॥यत्रवाऽन्यदिवस्यात्तत्रान्योन्यत्पश्येत्॥यत्रत्वस्यसर्वमा।
त्मैवाभूत्तत्केनकंपश्येदिति॥अविद्याविद्ययोर्व्यवस्थामाह॥यथाकाकस्यरात्र्यंधस्य

यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः॥६९॥

दिनमुलूकस्यदिवांधस्यनिशा॥रात्रौपश्यतश्चोलूकस्यपदिनंरात्रिरेवसाकाकस्येति
महदाश्चर्यमेतत्॥अतस्तत्त्वदर्शिनःकथमाविद्यकक्रियाकारकादिव्यवहारःस्यादि
ति॥स्वतःसिद्धएवतत्संद्वियसंयमइत्यर्थः॥६९॥श्रीरामजीसहाय॥ ॥ ॥

गी॰टी॰
म॰द्वि॰
६॰

60

एतादृशस्य स्थितप्रज्ञस्य सर्वविक्षेपशांतिरप्यस्तीति सदृष्टांतमाह । आपूर्यमाणमिति सर्वाभिर्न
दीभिरापूर्यमाणं संतं वृष्ट्यादिप्रभवा अपि सर्वा आपः समुद्रं प्रविशंति ॥ कीदृशं ॥ अचलप्रति।
ष्ठमनतिक्रांतमर्यादं ॥ अचलानां मैनाकादीनां प्रतिष्ठा यस्मिन्निति वा गांभीर्यातिशय उक्तः य
द्वद्येन प्रकारेण निर्विकारत्वेन तद्वत्तेनैव निर्विकारत्वप्रकारेण यं स्थितप्रज्ञं निर्विकारमेव
संतं कामाः अज्ञैर्लौकिकैः काम्यमानाः शब्दाद्याः सर्वे विषयाः अवर्जनीयतया प्रारब्धकर्मवशात्
प्रविशंति न च विकर्तुं शक्नुवंति ॥ समुद्रस्थानीयः स्थितप्रज्ञः शांति सर्वलौकिकालौ

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् ॥ तद्वत्कामा यं
प्रविशंति सर्वे । स शांतिमाप्नोति न कामकामी ॥ ७० ॥ ॥

किककर्मविक्षेपनिवृत्तिं वाधितानुवृत्ताविद्याकार्यनिवृत्तिं चाप्नोति ज्ञानबलेन ॥ न कामका
मी ॥ काम्यान्विषयान्कामयितुं शीलं यस्य स कामकामी अज्ञः शांतिं व्याख्यातां नाप्नोति । अपि
तु सर्वदा लौकिकालौकिककर्मविक्षेपेण महति क्लेशार्णवे मग्नो भवतीति वाक्यार्थः । एते
न ज्ञानिन एव फलं भवतो विद्वत्संन्यासः ॥ तस्यैव च सर्वविक्षेपनिवृत्तिरूपा जीवन्मुक्तिर्दैवाधी
न विषयभोगेपि निर्विकारतेत्यादि कमुक्तं वेदितव्यं ॥ ७० ॥ ॐ श्रीकृष्णायनमो नमः ॥ ।

६॰

यस्मादेवं तस्मात्प्राप्तानपि॥ सर्वान्बाह्यान् शब्दादीन्॥ आन्तरान्मनोराज्यरूपान्वा मनोमात्ररूपांश्च परित्यज्य तत्तच्छास्त्रशीर्षरूपतल्पान्कामांश्च विद्यमानपि विहायोपेक्ष्य। शरीरजीवनमात्रेपि निःस्पृहः सन् यतो निरहंकारः॥ शरीरेंद्रियादावयमहमित्यभिमानशून्यः॥ विद्यावत्त्वादिनिमित्तात्मसंभावनारहित इति वा॥ अतो निर्ममः॥ शरीर।

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः॥ निर्ममो निरहंकारः स शांतिमधि
गच्छति॥७१॥

यात्रामात्रार्थेपि प्रारब्धकर्माक्षिप्ते कौपीनाच्छादनादौ ममेदमित्यभिमानवर्जितः सन् यः पुमांश्चरति प्रारब्धकर्मवशेन भोगान्भुंक्ते॥ यादृच्छिकतया यत्र क्वापि गच्छतीति वा॥ एवंभूतः स्थितप्रज्ञः शांतिं सर्वसंसारदुःखोपरमलक्षणामविद्यातत्कार्यनिवृत्तिमधि गच्छति ज्ञानबलेन प्राप्नोति॥ तदीदृशे व्रजनं स्थितप्रज्ञस्येति चतुर्थप्रश्नस्योत्तरं परिसमाप्तं

गी॰टी॰
म॰द्वि॰
६१

तदेवं चत्वारिंशप्रश्नानामुत्तरव्याजेन स्थितप्रज्ञलक्षणानि मुमुक्षुकर्तव्यतया कथितानि ॥ संप्रति कर्मयोगफलभूतां सांख्यनिष्ठां फलेन स्तुवन्नुपसंहरति एषेति ॥ एषा स्थितप्रज्ञलक्षणव्याजेन कथिता ॥ एषा तेभिहिता सांख्ये बुद्धिरिति च प्रागुक्ता स्थितिर्निष्ठा सर्वकर्मसंन्यासपूर्वकपरमात्मज्ञानलक्षणा ब्राह्मी ब्रह्मविषया हे पार्थ एनां स्थितिं प्राप्य यः कश्चिदपि पुनर्न विमुह्यति ॥ न हि ज्ञानबाधितस्याज्ञानस्य पुनः संभवोस्ति ॥ अनादित्वेनोत्पत्त्यसंभवात् ॥ अस्यां स्थितावंतका

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृच्छति

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोध्यायः ॥

लेपि अंत्येपि वयसि स्थित्वा ब्रह्मनिर्वाणं ब्रह्मणि निर्वाणं निर्वृतिं ब्रह्मरूपं निर्वाणमिति वा ऋच्छति गच्छति अभेदेन किमु वक्तव्यो ब्रह्मचर्यादेव संन्यस्य यावज्जीवमस्यां ब्राह्म्यां स्थिताववतिष्ठते स ब्रह्मनिर्वाणमृच्छतीत्यपिशब्दार्थः ज्ञानेन तत्साधनेकर्मसत्वशुद्धिश्चतत्फले तत्फलंज्ञाननिष्ठे वेत्यध्यायेस्मिन्प्रकीर्तितं ७२ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां श्रीभगवद्गीतागूढार्थदीपिकायां सर्वगीतार्थसूत्रणं नाम द्वितीयोध्यायः ॥ २ ॥ समाप्तिमगात् ॥ ॥ शुभमस्तु ॥

अन्तःकरणशुद्धिः =

६१

ज्ञान निष्काम कर्म